नं० ५४६-घ
रसतरङ्गिणी
पत्राणि २६
(अलंकारशास्त्रम्)

सं० ५४१ ८

रसलोहकृती

२८ पन्ना

असाध्यरोगज्ञान

कर्ता . श्री

लि. ति. १९०२

श्रीगणेशायनमः॥ लक्ष्मीमालोक्यकुम्भस्थलनिगममुपह्नसनूणोचयन्नयन्नजंतूक्षत्रेणाक्षिप
त्यन्तस्मितिदृशामुखंवीक्षरोमांचमंचन॥ दृष्ट्वाहैयंगवीनंचकितमपसरन्मोक्षरार्द्धदिगंता
न्सिंचन्दंतेनभूमिंतिलमिवतुलयन्पातुमांपीतवासा॥१॥ भारत्याःशास्त्रकांतारश्रांतायाःशै
त्यकारिणी॥ क्रियतेभानुनाभूरिरसारससतरंगिणी॥२॥ वाणीकमलिनीभानोरेषारसतरंगि
णी॥ हंसाःकृतधियस्तत्रयुक्तमत्रप्रतीयतां॥३॥ गिरांदेवितरंगिण्यांवारपकूलवारणान्॥ यद्व
यिष्यतितेलोकानामाविलोविलोरसः॥४॥ हेतोःपूर्ववर्तित्वनियमात्पूर्वमेवतस्यापिन्यासः
समुचितोरसस्यहेतवोभावादयस्तेनरसेभ्यःपूर्वंभावादयएवनिरूप्यंते॥ रसानुकूलोभावः विकारो
विकारोमथाभावः॥ विकारश्चद्विविधः॥ आंतरःशारीरश्च॥ आंतरोपिद्विविधः॥ स्थायिभावो
व्यभिचारिभावश्चेति॥ शारीरस्तुसात्विकः॥ यत्तुमनोविकारोभावंतयाचदेहविकारेस्वेदादोभा शिव
वपदप्रयोगोगौणइति॥ तन्न॥ तुल्यवदुभयत्रभावपदप्रयोगेणाविनिगंतुमशक्यत्वात्॥ लक्षणा
नुरोधेनलक्ष्यस्यव्यवस्थितेः॥ इतरभावस्यात्मभावत्वोपनायकत्वेसतिसजातीयविजातीयभा
ग

वानभिभाव्यः ॥ प्रथमः पर्यांनभिभाव्यो यो मनोविकारः ॥ सकलप्रधानो मनोविकार इति स्थायीभावः
नचअभिचारिणिसात्विकभावेवाअभिचारितेस्मितरभावस्यात्मभावत्वोपनायकत्वाभावात् ॥ चर
मसमयेपिस्थायित्वात्स्थायित्वव्यपदेशः ॥ सचाष्टधा ॥ तत्र भरतः ॥ रतिर्हासश्च शोकश्च क्रोधोत्साहौ
भयंतथा । जुगुप्साविस्मयश्चेति स्थायिभावाः प्रकीर्तिताः ॥ तत्रेष्टवस्तुसमीहाजनितामनोविकृतिरप
रिपूर्णारतिः साचयत्किंचिद्दर्शनेनेत्यकिंचित्सुखरसोत्पन्नचित्तस्मरणेन ॥ यथा ॥ चक्षुर्यस्यतवैवलोलनिगदितंपीयू ष्मधी
षपाथोधरोभ्रूसंज्ञापरिग्रहिकाममजनिस्फीतंस्मितंदोहदं ॥ संतापंतनुतांगार्केकर्कैयारुचिंनिःश्वा
सवाताहालिंकसमादेषसस्निह्यतेसखिसचप्रेमप्रकृष्टः कोमलः ॥ कोमलपदादपूर्णता ॥ कुतूहलकृत
वचन ॥ विषयवेषाद्यपकृतोमनोविकारः ॥ परिमितोहासः ॥ वचनभेदवेषभेदकृतेभ्यःक्रोधोवानालि
ष्याप्तिः ॥ तत्रकुतूहलकृतत्वाभावात् ॥ यथानातनवरागानां ॥ आगच्छन्तगरोपकंठमिलितेरावेष्टितो
बालेकैः श्रुद्धतेपरिचारिकाभिरचितंसोल्लासमावेदितः ॥ साकूतंसकुतूहलंचलितवधूवृन्देपुरोदा
पयस्यन्तंकिंचिदुदंचितःस्मितलवःपायात्सवोवामनः ॥ लवपदादपूर्णता ॥ इष्टविश्लेषजनितो
रत्स्यनालिंगितःपरिमितोमनोविकारःशोकः ॥ नचेष्टविश्लेषजनितविप्रलंभशृंगारस्यकरुणारस

र·त·टी २ २ रती

त्यापत्तिः ॥ तस्य रसस्यालिंगितत्वात् ॥ न च रतिः श्रीतिस्तया विनाशोकोपि नोत्पद्यत इति तथा चासंभव इति वा
च्यं ॥ इष्टसमीहाजनितमनोविक्षतेरुक्तत्वात् ॥ कुमारसंभवे रत्याः । कादंबर्यां महाश्वेतायाः रघुकाके
ऽजविलापे करुण एव रसः ॥ तत्र तत्र वाचनिश्चयादिष्टवस्तुसमीहायाः अभावात् ॥ यत्र च मृते जीवि
तासंशितत्र शृंगार एव रसः ॥ यथा संदेहस्य ग्राह्यसंदेहपर्यवसिततया समीहाया अप्रतिबंधकत्वा
त् ॥ तथा च पुनरेकस्मिन्मृते प्रलापः करुणरसः ॥ जीवितोर्दिशि [illegible] प्रयोः प्रलापः शृंगारः । अत एव
वासरत्नप्रदीपिकायां करुणरसोदाहरणं ॥ अयि जीवितनाथ जीवसीत्यभिधायोत्थितया त
या पुनः ॥ ददृशे पुरुषाकृति क्षितौ हरकोपानलभस्म केवलं इति ॥ ननु विप्रलंभस्य पूर्वानुरागमान
प्रवासकरुणात्मकत्वाज्जीवितोरपि विप्रलंभस्य करुणरसत्वमायातमिति चेत्सत्यं तत्र करुण
रसस्यांगत्वेन भासमानत्वात्करुणात्मकत्वव्यपदेशः ॥ यथा ॥ विरहज्वरमूर्छयापतंतीं नयने
नाश्रुजलेन सिंचमानां ॥ समवेक्ष्य रतिं विनिःश्वसंतीं करुणाकुलिताबभूव शंभोः कुस्म
लितेस्य पूर्णता ॥ अवज्ञादिहेतुः प्रमोदप्रतिकूलः ॥ परिमितो मनोविकारः क्रोधः ॥ प्रमोदप्रति
कूलेति विशेषणात्तृषामुखदुर्वचनावमानितस्य रामस्य वीररसे नातिव्याप्तिः ॥ यथा परशुराम

शिव २

२

वाक्यं ॥ नाधारम्भकरोमि कार्मुकलतां विस्मयस्त हस्तांबुजः किं विस्माटलमासि लोचनयुगेनावन्निमे
घोदयात् ॥ धावत्साधककोटिपाटितरिपुक्ष्मापालमौलिस्खलन्मध्ये मालस्यपतत्सरागपटलैर्नो मोदि
ता मेदिनी ॥ किं विस्माटलता दष्टांतता ॥ सोर्थ्यदानदयाम्नतरकृतः परिमितो मनोविकार उत्साहः ॥ वी
रस्तु युद्धवीरदयावीरदानवीरभेदात्त्रिधा ॥ युद्धवीरस्योत्साहो यथा ॥ सेनां संघटयन घातिं द्विगुणयंश्चा
पं श्यामल्कारयन्नेत्रस्याभिमुखो भविष्यति जैद्विद्वावणाराघवाः ॥ कृत्सुत्साह विचारसुग्ध हृदयो देवो
धूर्तां पतिर्मोर्धिमास विधिं विनैव विधिविधंवाराणासने नम्रसयान् ॥ अत्र विचारादष्टांतता ॥ दानवी
रस्योत्साहो यथा ॥ आदर्शां पद्मांकमंडलमिदं हर्म्याय हेमाचलं दीपाय द्युमणिं महीमिव कथं नो
भिक्षवे दत्तवान् ॥ दित्साप्रवर्धितप्रमोदसलिलस्याकीर्णनेत्रांबुजो जानीमो भृगुनंदनस्तदखिलं न
प्राप्यतो दृष्टवान् ॥ प्रवर्धितो न तु फलितदृष्टांतता ॥ दयावीरस्योत्साहो यथा ॥ दुस्तारसंसारपयोधिपार
प्रकारमालोचयतो जनानां ॥ समुत्थितो वक्षसि केरभारेः क्षपांकुरः कौस्तुभकैतवेन ॥ अंकुरोपन्यास कृ=
दृष्टांतता ॥ अपराधविस्मृतत्व विस्मृतसत्वादिजनितो परिपूर्णो मनोविकारो भयं ॥ यथा ॥ तार्क्ष्यपक्ष
पवनोपसेवितं वीक्ष्य वीक्ष्य यदुनंदनं पुनः ॥ भीतभीतनयनत्रकालियो मंदमंदमपसर्पनुद्यतः ॥ इवो

पन्मासादपूर्णता ॥ अहृद्यदर्शनस्पर्शनस्मरणाज्जनिता मनोविस्तृतिरपरिपूर्णा जुगुप्सा यथा
शार्दूलशावककचर्चरचर्व्यमानः सारंगशृंगवति भृष्टनि नाम चंद्रः ॥ वासं चकार नव भारतथा जु-
3 गुप्सां कुः स्वेघ्नं कुःस्वमतिरिव नक्तुःस्विनानां नन्वथेति मिथ्यादपूर्णता ॥ चमत्कारदर्शनस्पर्शनस्मर-
णाज्जनितापरिपूर्णा मनोविकारो विस्मयः ॥ यथा ॥ पुष्पं तमर्जुनं वीक्ष्य केवादे यान विस्मिताः
नमेनेव हुगोविंदो हष्टकर्मा पराक्रमः ॥ नमेनेव त्रिकृतिपदादपूर्णता ॥ शृंगारादौ चमत्कारदर्शना-
प्रचमनोविहृतिंगतयाभासते न शृंगार एव रसः ॥ प्राधान्येन यत्र भासते न अद्भुत एव रसः ॥ अं-
गतया यथा ॥ वेधमेघकृतिपंकजात्मकः यस्मान्नेदनीरं दृशोः स्वर्णालंकरणाद्भुतं न क्षिपुलको वे
धर्म्मसंगाश्रियः ॥ तस्मान्नूपुरपद्मरागसहसंपादारविंदश्रियो भेदं सिंजितमेव कैः किमितः थि
संविधेर्दर्शिता प्राधान्येन यथा विमानसायंकोयं समुदयति सोम्यमृभागः किरंज्योत्स्नाधारा
मधिधरणितानापरिहृतः ॥ धनुर्धरैस्मारं नियति विहारं नलमसं निरातंकः पंकेरुहपुगाल
मंके नटयति ॥ इति श्रीरसतरंगिण्यां भानुदत्तविरचितायां स्थायिभावनिरूपणं नाम प्रथ शिव ३
मस्तरंगः ॥ १ ॥ अथ विभावा निरूप्यन्ते ॥ विशेषेणाभावयंत्युत्पादयंति ये रसं ते विभावाः ते

यद्विविधाः॥आलंबनोद्दीपनविभावाश्चेति॥यमालंब्यरसस्तूत्पद्यतेसआलंबनविभावः॥ये
रसउद्दीपयतिसउद्दीपनविभावः॥आलंबनविभावोयथा॥आत्मासप्रतिमूर्त्तिःप्रमात्मापुरापल
तिकाया॥अभिदैवतंनयनयोर्ममयामाकापिलासेव॥शृंगारस्योद्दीपनविभावः।तत्रभरतः
ऋतुमाल्यालंकारैःप्रियजनगांधर्वकाव्यसेवाभिः॥उपवनगमनविहारैःशृंगाररसःसमुद्भ
वति॥चंद्रचंदनाद्युद्दीपनीया॥यथा॥तंआलोकांवरजयनिकाकामिनोःप्रेमनाद्येनांदीश्रा
ध्वद्भ्रुमरविरुतेमारिषःकोपिकालः॥तारापुष्पांजलिमिवकिरन्सूत्रधपुष्पकेतोर्नसांभ्र
विशान्तिर्मुग्धाद्दीधितिःसूत्रधारः॥अथहास्यविभावाः॥तत्रभरतः॥विपरीतालंकारैर्विकृताचा
राभिधानवेषैश्च॥विकृतैरर्थविशेषैर्हसतीतिरसःस्मृतोहास्यः॥अंगविकृत्याद्युद्दीपनीयाः
यथा॥केशांघ्रद्वयेनभ्रमयमौलिंविवर्त्तयनबाहू॥नेत्रांचलेचपलयन्नटयतिमायाविशि
शुक्षायां॥करुणरसस्यविभावाः॥तत्रभरतः॥इष्टजनस्यविभावाच्छायालेशाद्वधबंधना
ससनात॥एतैरर्थविशेषैःकरुणाख्योरसःसमुद्भवति॥बंधुदारिद्र्याद्युद्दीपनीयाः॥यथा॥तांप
धा श्यतोभुजगपाशनिबद्धदेहमपापिमेयदसवोनबहिःप्रयांति॥नेत्रेनिमीलयसिपश्यसि

नैवतावद्दास्यमदीयमितिलक्ष्मणायुक्तमेव ॥ अथरौद्रविभावाः ॥ तत्र भरतः ॥ आयुधप्रक्षे-
क्षणाभिभवाधिक्षेपच्छेदनाच्छिद्रदारणाच्चैव ॥ संग्रामसंभवाद्यैरेभिः संजायते रौद्रः ॥ वैरिदर्शन
निर्भर्त्सनाद्यप्यूहनीयाः ॥ यथा ॥ तन्वंतीतिमिरद्युतिंहसतवतीप्रत्यर्थिचक्रंमयामेघाभार्गव
तावकीविजयतेनिस्त्रिंशधारानिशा ॥ युक्तंकुक्षिपक्षपक्षविदलत्कुंभीन्द्रकुंभस्थलभ्रश्य
मौक्तिककैतवेनपरितस्तारावलींवर्षति ॥ वीररसस्यविभावाः ॥ तत्र भरतः ॥ उत्साहाध्यवसाया
द्विषादित्वाद्विस्मयान्मोहात् ॥ विविधादर्थविशेषाद्वीररसोनामसंभवति ॥ विनयबला
द्यप्यूहनीयाः ॥ यथा ॥ लंकाधिपःसंपतिशंकनीयोजंभारिजंभाहतवाहुवीर्य्यैः ॥ इत्यालप
त्यनुमंतमेषरामःस्मितोत्तरंयांचकार ॥ दानवीरस्यविभावोयथा ॥ वपुषाविनयंवहंतिके
चिद्वचसाकेपिचरंतिचारुचर्य्यां ॥ अतिथौसमुपागतेसपर्य्यांपुलकैःपल्लवयंतिकेपिसं
तः ॥ दयावीरस्यविभावोयथा ॥ कथमविरलजाग्रड्डिंभभाजोनिशायांतमसिदुरवगाहे
प्राणिनोवीक्षणीयाः ॥ इतिकिमुसमुदंचद्दीपलेखाभिरामैर्द्युतिमुरसिमुरारिःकौस्तुभं
संबभार ॥ ननुसुखनिष्ठउत्साहःकथमुद्दीपनविभावोभवतीतिचेत्सत्यं ॥ उद्दीपनविभावो

हिंस्यमान एव गमकः ॥ स स्वनिष्ठः परनिष्ठो वेति न विशेषः ॥ अनुभावस्तु स्वनिष्ठ एव गमकः तत्
स्यानुमापकत्वेन पक्षसत्त्वनियमादिति ॥ ननु दयावीरः कथं करुणा एव नांतर्भवति ॥ निरुपाधि-
परदुःखप्रहाणेच्छा दया ॥ सा च करुणाविभावेन संभवतीति चेन्न करुणास्य स्थायिभावस्य शोक-
त्वात् दयावीरस्य स्थायिभाव उत्साह इति स्थायिभावभेदेन भेदात् ॥ ननु दयावीरे करुणा ध्वनीतेः का गति-
रिति चेत् सत्यं ॥ करुणा यद्यपि न त दयावीरस्यानुभावात् न तत्र करुणायाः अनुभावकत्वादिति ॥ भया-
नकस्य विभावाः ॥ तत्र भरतः ॥ विकृतरवसत्त्वदर्शनसंग्रामारण्यशून्यगृहगमनात् ॥ गुरुनृपयोर-
पराधात्कृतकश्च भयानको ज्ञेयः ॥ धार्ष्टिकाबंधुवधबंधनश्रवणावम ध्वानदर्शनादयः उद्दीपनीयाः ॥ यथा
उपलकांतिकठोरकेशपाददलसाघोषवलद्विघुद्दीधितिकांचनीकृतजगन्निःशेषभूमीधराः ॥ स्फू-
र्जत्कंठनिनादभिन्नवसुधामार्गप्रविष्टद्विजश्रेष्ठाकीर्णवचनप्रहर्षितबलिस्फो लोकिमायाहरिः
बीभत्सस्य विभावाः ॥ तत्र भरतः ॥ अनभिमतदर्शनेन च गंधरसस्पर्शदोषैश्च ॥ उद्वेजनैश्च बहुभि-
र्बीभत्सरसः समुद्भवति ॥ अहृद्यवस्तूनां श्रवणाम्मरणादयः उद्दीपनीया ॥ यथा ॥ योधानामधरैरशो-
ककुसुमैर्नेत्रैः सितैस्तंधुजैर्दंतैः कुंददलैः करैः सरसिजैः संपाद्य पुष्पांजलिं ॥ सिद्धिं कर्णयुगं विधाय
कलिंगारक्तावसिक्तांगकैः प्रेतानां बहुभिः पुरः पुरभिदो नृत्यं समारभ्यते ॥ अद्भुतस्य विभावाः ॥ तत्र भ

5

रतः ॥ यस्मातिशयार्थं युतं वाक्यं शिल्पं च कर्मरूपं च ॥ तत्संवेद्यैरर्थैरसोद्भूतो नाम संभवति मायेंद्रजा
लार्थं लाभादयश्चोद्दीपनाः ॥ यथा ॥ कुद्दामोद्दाममायामयमिति भटद्दलनोद्यजाग्रत्स्थायिभावः सोऽयं देवो मु
देवो भवतु नरहरिस्तारिताशेषविश्वः ॥ यस्मिन्प्रेंखत्कलापोद्भटविकटसटाकोटिभिः पाटितानां मंत्रा
णां भोधरणानां वहिरिव निरगुर्विद्युतां कैतवेन ॥ इंद्रजालं यथा ॥ कोऽप्यम्भोजगतासीनोऽपि सांध्यवि
राम्निविस्ताराध्वेलांचलेध्यांतेः कामिन्याः कामभिल्लिजगतां नेत्रानि संमोहयन ॥ नायकोभिकमो
भिका निविदग्गाम्रे तीरयच्छमनाज्जीज्जीं दलस्यद्गिः करोतिवदनास्य याकृतामाधिकः ॥ इति श्रीमा
नुदत्तविरचितायां रसतरंगिण्यां विभावनिरूपणं नाम द्वितीयस्तरंगः ॥ २ ॥ अथानुभावान्निरू
पयंते ॥ येरसाननुभावयंति अनुभावको च तान्नयंतीति अनुभावाः कटाक्षादयः ॥ कटाक्षत्वेनानु
भावकता ॥ करणत्वेन च फलायोगव्यवच्छेदेन संबंधित्वं ॥ ननु रसे कथमनुभावकापेक्षेति चेत्स
त्यं ॥ स्थायिभावः परिपूर्णो रसस्तस्यांतरत्वाद्व्यापकेन विना कथं ज्ञानमित्यनुभावकस्यापे
क्षणीयत्वात् ॥ ननु कटाक्षादयः कथमुद्दीपनविभावा न भवंति दृष्टे कटाक्षादौ कामिनो मनो
विकारः परिपूर्णो भवति ॥ अनुभवसिद्धत्वेनापह्नोतुमशक्यत्वात् ॥ किंच ॥ प्राचीनसंमतिर
पि दृष्टक्रितपस्मपंक्तिभिरनाकूतसमिलेबोसितोरनेरपनवायघनृंदीकरक्रोडे जगद्धातोते ॥ अं

शिव ५

तः पांसुलहेमकेतकदलद्रोणी कुरापयश्रियो दोर्मूलस्य विभावनादिह पुनः॥ क्रूरे किमाकांक्षसी

त्यादय इति चेन्न स्वकटाक्षादीनां करणत्वेनानुभावकत्वं॥ विषयत्वेनोद्दीपनविभावत्वं॥ तथा चा

त्मनिरसानुभवकरणत्वेन नायिकां प्रति कटाक्षादयोनुभावाः तद्दृष्टिगोचरीभूताः॥ कामि

नीमनोविकारं प्रति विषयत्वेनोद्दीपनविभावा इति॥ स चानुभावः॥ कायिकमानससाहार्यसात्वि

कभेदाच्चतुर्द्धा॥ कायिका भ्रूनक्षेपादयः॥ मानसाः प्रमोदादयः॥ आद्ये चतुर्भुजत्वस्नानादयश्चाहा-

र्याः॥ सात्विका रोमांचादयः॥ शृंगारस्यानुभावाः॥ तत्र भरतः॥ नयनवदनप्रसादैः स्मितमधुरवचो

धृतिप्रमोदैश्च॥ विविधैरंगविकारैस्तस्याभिनयः प्रयोक्तव्यः॥ कटाक्षभ्रूनक्षेपादय ऊहनीयाः॥

यथा॥ मुक्ताहारस्तनकलशयोः कर्णयोः कर्णिकायं मौलौ मालापरिभवभयादेव दूरमेवारि हृ

ष्टे भीष्टे समजनि पुनः शुभ्रुवो भृंगमाला प्रातर्यातो नवलकमलद्रोहदक्षैः कटाक्षैः॥ हास्यस्यानुभा

वाः॥ तत्र भरतः॥ विकृताकारैर्वाक्यैरंगविकारैर्विकृतवेषैश्च॥ हासं जनयेद्यस्मात्तस्माज्ज्ञेयो रसो

हास्यः॥ आस्याधरविवरणदशनदर्शननासाकपोलस्पंददृष्ट्याकोचाकुंचनादय ऊहनीयाः॥

6

यथा ॥ यदीयहस्तकपालमंडलमिदं पियूषभानोः कलां चलीहस्तपकलामलिनं कपालपतोस्तंबाद्यनसं
शिखंडा ॥ सा यं दीपयि विधिविचिन्वति शिखो मंदं हसं स्मातया किंचिल्कुंचदपांगकुटिलाद्दृष्टिः समा भंग
रोपिता ॥ करुणस्यानुभावाः ॥ तत्र भरतः ॥ निश्वसितेन विरुदितैर्मोहक्षितिपातदैन्यनिंदाभिः ॥ अभि
नेयः करुणरसो देहायासादिभिश्चैव मुखशोषप्रलापवैवर्ण्यादयस्तूहनीयाः ॥ यथा ॥ तातेनिर्गे
छतिगरणपतौ नाकमद्यापि नस्माजाचांदेयाः पतति शिथिलं कंकणं नैव दोष्णः ॥ अथाप्याद्रीभव
ति कुचयोर्नो पिपासीर्ष्यंकोनेत्रे निर्यत्समयसितपुनः कज्जलं स्थैर्यमेवेति रौद्रस्यानुभावाः ॥ तत्र भ
रतः ॥ नानाप्रहरणासंकुलशिरः प्रकंपैः कराग्रनिष्पेषैः घोरैरर्थविशेषैस्तस्याभिनयः प्रयोक्तव्यः
भ्रुकुटीदंतोष्ठपीडनाद्यस्तूहनीयाः ॥ यथा ॥ येषे भीमेन चक्रभ्रूकुटिघनरवं दंतनिष्पीडितोष्ठं
विक्षिप्ताक्षो स्मिविंध्याचलवदुलेचमत्काराभाजः करींद्राः ॥ तेषामेषा कपोलादिषु भयविधुलात्का
चित्तुद्वीयत्नतां विवेपीयूषभानोर्मधुकरपटलीलांछनस्पछलेन ॥ वीररसानुभावाः ॥ तत्र भरतः ॥
बलशौर्यधैर्यवीर्यैरुत्साहपराक्रमप्रभावैश्च ॥ वाक्यैराक्षेपकृतैर्वीररसः सम्यगभिनेयः ॥ विन

शिव
६

यदनादयउद्दीपाः॥ नन्वतींद्रियपरस्य ज्ञापकाः शारीरधर्मा भवितुमर्हंतीति तस्य सर्वथो
क्तात्तथात्वथैर्थ्योत्साहेन शरीरधर्मा विनिवेश्यते॥ थैर्थ्यपदेन चांचल्याभाव उक्तः साहपदेन वा
श्रु॥ पुलकादयो विवक्षिताः॥ यद्वा अनुभावस्यानुविधः॥ तत्र मानसोऽनुभाव उक्तः॥ तस्य च ज्ञान
मेवानुभावकं तत्र मानसमैंद्रियकं चेति न विरोधः॥ युद्धवीरस्योत्साहो यथा॥ अग्रे व्यासवजितस स्यानुभावो
प मग्रमैरआपारदीक्षागुरुः पार्श्वेन स्वविपक्षपक्षमर्दनक्रीडाधनो रावणः॥ द्रव्यं जस्यातिसर्वे
तः परिजने संभ्रमस्थितिं कुर्वतः श्रीरामस्य न कुंभकस्य पवनेक्षुस्य, सकोपि क्रमः॥ दयावीरस्या
नुभावो यथा॥ ध्वांतस्तोमधरे जगद्भयकरे पाथोधरे वर्षति क्रोडव्याकुलवत्सगोकुलदयादी
नेक्षणः केशवः॥ हस्तन्यस्तमहीधरस्तु निमिषान्नैवांगुलीपल्लवैर्वैगुण्यस्तम्सुरीकरोतीति नतनोः
स्वत्तं हरसेस्तुकं॥ दयावीरस्यानुभावो यथा॥ श्रोदासंन विधेहि गच्छ न गृहात्संवीक्ष्य मद्द्राज
नं पात्रे किंतु भवंतमेतदखिलं कोसक्षगांक्षम्यतां॥ दासश्चेदहमस्मि ते वसुमती सर्वैव संगृ
ह्यतां स्वर्गो चेत्पुरुदक्षिणा धनपतेरानीय संपाद्यते॥ भयानकानुभावाः॥ तत्र भरतः॥ करचर
णनेत्रमस्तकसर्वांगानां प्रकंपनेश्चैव॥ शुष्कोष्ठतालुकंठैर्भयानको नित्यमभिनेयः॥ रो

7

मोचनं हृदयावेगश्चापि स्वेदादयश्चोहनीयाः ॥ यथा ॥ यत्र ज्वलज्ज्वालावलीढवदनमाकीर्णफेनोत्क
पं काकुव्याकुलघोरघर्घरवस्कारीभवल्लोचनं ॥ कंपप्रस्खलदंघ्रियाननतनुश्वासोर्मिनुन्नाध
रं विस्तीर्णभुजंगमस्य चक्रकुहरे हस्तस्य गावः स्थिताः ॥ बीभत्सानुभावाः ॥ तत्र भरतः ॥ आननने
त्रविघूर्णनलोचननासामुखाच्छादैः ॥ अव्यक्तपादपतनैर्बीभत्सः सम्यगभिनेयः ॥ सर्वांगसं
कारनिष्ठीवनादयश्चोहनीयाः ॥ यथा ॥ कपदहरे मुखकुहरे विस्तृते संधीस्य दिनकरं लक्ष्मीः स्रुत
देसपललेकवलभ्रांसामुखमंगुलैः पिदधे ॥ अद्भुतरसानुभावाः ॥ तत्र भरतः ॥ स्पर्शग्रहणोल्ला
से हाहाकारैश्च साधुवादैश्च ॥ वेपथुगद्गदवचनैः स्वरभेदैरभिनयस्तस्य निर्निमेषप्रेक्षणारो
मांचादयश्चोहनीयाः ॥ यथा ॥ पांडवं वीक्ष्य दोर्दंडखंडितारातिमंडलं अद्यापि नाकिनां नेत्रैः
निमेषाणि च जायते ॥ इति श्रीभानुदत्तविरचितायां रसतरंगिण्यां अनुभावनिरूपणं नाम
तृतीयस्तरंगः ॥ अथ सात्विकभावा निरूप्यंते तत्र भरतः ॥ स्तंभः स्वेदोथ रोमांचः स्वर
भंगोथ वेपथुः ॥ वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्विकाः स्मृताः ॥ ननु अस्य सात्विकत्वं कथं अभि शिव
चारित्वं न कुतः ॥ सकलरससाधारण्यादिति चेत् ॥ अत्र केचित् ॥ सत्वं दुःखभावनायामसंता ७

नुकूलत्वं ॥ तेन सत्त्वेन भूता सात्त्विका इति अभिचारित्वमनात्मस्य सात्त्विक(तौ)व्यपदेशा इति तन्न
निर्वेदस्यापि धृतिप्रभृतीनामपि सात्त्विकव्यपदेशापत्तेः ॥ न च परगतदुःखभावनायामश्रावे
तेसमुत्पद्यते तस्यानुकूल्यमात्रार्थः ॥ अत एव सात्त्विकत्वमेषामिति वाच्यं ॥ निर्वेदादेरपि परदुः
खभावनायामनुत्पत्तेरिति ॥ अत्रेदं प्रतिभाति सत्त्वशब्दस्य प्राणिवाचकत्वात् ॥ अत्र सत्त्वं जी
वच्छरीरं तस्य धर्माः सात्त्विकाः तथा च शारीरत्वात् स्तंभादयः सात्त्विका भावा इत्यभिधीयंते
स्थायिनो व्यभिचारिणश्च भावा आंतरीया न शारीरधर्मा इति ॥ शारीरधर्मत्वे सति गतिनिरो
धः स्तंभः ॥ न च निद्रापस्मारादावतिव्याप्तिः ॥ शारीरधर्मपदेन तेषां व्यावर्तनात् प्रलयभावे तु चे
ष्टानिरोधो न गतिनिरोधः ॥ अस्य विभावा हर्षरागभयदुःखविषादविस्मयक्रोधाः
यथा ॥ श्रोणीपीनतरा तनुः स्तनतरा भ्रूभीधरासीनरावसौ जस्यतटी कुतो निजकुटीमात
मेयागम्यतां ॥ इत्युक्ता स्मकदंबकं जनिकटे निर्विण्णमंदस्मितं गोविंदं समुदीक्ष्य पक्ष्मलदृशा
स्तंभः स्तिरोधीयते वपुषि सलिलोद्गमः स्वेदः ॥ अस्य विभावाः ॥ मनस्तापहर्षलज्जाक्रोधश्रम
भयश्रमपीडा घातमूर्छा ॥ यथा ॥ कांतेन वकुलं घ्रातेराजंते स्वेदबिंदवः ॥ हृष्यतामदनेनै

8

वसंतीः कुसुमस्पर्शजः ॥ विकारसमुत्थरोमोद्गमो रोमांचः अस्य विभावाः ॥ प्रीतालिंगनहर्ष
भयक्रोधाः ॥ यथा ॥ बकुलमुकुलकोषरोषनिर्यन्मधुकरकूजितभाजि कुंजमध्ये ॥ पुलकपति
कपोलपालिमालिस्मितसुभगः कथमेष नंदनस्तनुः गद्गदत्वप्रयोजकीभूतस्वरस्यभा
व वैजात्यं स्वरभंगः ॥ अस्य विभावाः ॥ क्रोधभयहर्षमदाः ॥ यथा ॥ अक्षिः स्यान्स्वरभेदस्य कोपा
द्भुक्षिः त्रियेतन्चेत ॥ इति पसुः पुरोराधामौनमाधायति यति ॥ भावत्वे सति शरीरकंपो वेपथुः
भावत्वे सती तिरिविरोधमतायदनात्सूचकस्पंदादौ नातिव्याप्तिः ॥ शरीरपदं चेष्टामात्र
परं तेन शारीरावयवकंपेनाव्याप्तिः ॥ अस्य विभावाः ॥ आलिंगनहर्षभीत्यादयः यथा
कथय कथय मुरोजदाम हेतोर्यदुपतिरेष चिनोतु चंपकानि ॥ भवति करतले यदस्य कंपः
प्रियसखि सखि तिरेवमा सपत्नी विकारप्रभवप्रकृतवर्णान्यथाभावो वैवर्ण्यं अस्य
विभावाः मोहभयक्रोधशीततापश्रमाः ॥ यथा ॥ कुंकुटे कुर्वति का रामानने श्लिष्टयो स्त
योः ॥ दिवाकरकराक्रांतशशिकांतिर्मियादधौ ॥ विकारजनितमक्षिसलिलमश्रु ॥ अस्य
विभावाः ॥ हर्षामर्षधूमभयशोकजृंभाशीतनिर्निमेषप्रेक्षणानि ॥ यथा ॥ विसृज विसृ
ज वितनु खबाधा मयमुपकंठमुपागतो मुरारिः ॥ इति वदति तनुमश्रुविंदुरक्षोर्निपत

शिव
८

तिर्यक्स्विपक्ष्मलापताक्ष्याः ॥ शारीरत्वे सति चेष्टानिरोधः प्रलयः शारीरत्वे सतीति विशेषणानि
द्रादौ नातिव्याप्तिः ॥ स्तंभादयः शरीरधर्मास्तेषां साहचर्य्यकथनेन प्रलयोपि शरीरधर्म्म एव ॥ तेन
च चेष्टापदेन शरीरचेष्टैवाभिमता ॥ मनसस्तु कर्म्म भवति न तु चेष्टा ॥ अत एव चेष्टाश्रयः शरीर
मिति शास्त्रीयं लक्षणं ॥ यथा ॥ नोचक्रं न मितं स्तुतं न च शिरो आवर्तितं नो वपुर्लोलो न स्वयमाह
तेनि गदितं नो वा निषेधाक्षरं ॥ शोकं नापि विलोचनं विरचितं क्रीडाकलाकातरं चेतः केवल
मानने मधुरिपोरार्पितं राधया ॥ जृंभा च नवमः सात्त्विको भाव इति प्रतिभाति ॥ कुतः जृंभानन
मुखमलकुचयुगं स्विद्यत्कपोलस्थलमित्यादि शृंगारतिलकादौ सात्त्विकभावसामानाधि
करण्यदर्शनात् ॥ न च सा जृंभा भावानुभाव इति विपरीतमेवाकिं न स्यात् ॥ स एवानुभावत्वे भाव
त्वाविरोधात् ॥ पुलकादीनां तथा दृष्टत्वात् ॥ न चांगाभूदवैत्र विमर्दनादीनामपि भावत्वा
पत्तिः तेषां भावलक्षणाभावात् ॥ रसानुकूलो विकार इति तस्य लक्षणं ॥ शृंगाररसस्याद्ये न वि
काराः किंतु शरीरचेष्टाः प्रमदासिद्धमेव तत् ॥ शृंगाररसछिभिरक्षिमर्दनं वा पुरुषैरिष्यतावधीय
तेमस्मतेव ॥ जृंभा च विकारादेव भवति तन्निरस्तौ निवर्तितो ॥ यथा ॥ आधायमानं दृढसिस्थि
तायाः संभ्रमाज्जृंभामवलोक्य जायाः ॥ वक्तुं ध्वनिं स्मेरमुखो महेशः करांगुलीभिः कलयांच

कारः ॥ इति श्रीभानुदत्तविरचितायां रसतरंगिण्यां सात्विकभावनिरूपणं नाम चतुर्थस्तरंगः
॥ अथ व्यभिचारिभावा निरूप्यंते ॥ तत्र भरतः ॥ निर्वेदग्लानिशंकाख्यास्तथासूयामदश्रमाः ॥
आलस्यं चैव दैन्यं च चिंता मोहः स्मृतिर्धृतिः ॥ व्रीडा चपलता हर्ष आवेगो जडता तथा गर्वो वि-
षाद औत्सुक्यं निद्रापस्मार एव च ॥ सुप्तं विबोधोमर्षश्चाप्यवहित्थमथोग्रता ॥ मतिर्व्याधिस्त-
थोन्मादस्तथा मरणमेव च ॥ त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः ॥ उत्पन्नानां रसेषु संचा-
रित्वं अनेकरसनिष्ठत्वं ॥ अनेकरसापकत्वं वा व्यभिचारित्वं ॥ न च रोमांचादावतिव्याप्तिः तेषा-
मपि संग्राह्यत्वात् ॥ ते च भावा व्यभिचारिणः ॥ एते चांतरा व्यभिचारिणः इत्यन्वियोषः ॥
ननु निर्वेदादेः स्थायित्वं व्यभिचारित्वं कथमिति चेन्न रसपर्यंतस्थायित्वमितरत्रगामित्वं
चोपाधिभेदमादायोभयसंभवात् स्वावमाननं निर्वेदः संसारे धिक्त्वबुद्धिर्वा ॥ तत्र विभावास्त- २८
त्वज्ञानापज्जिहीर्ष्यादयोनुभावाः ॥ खेदप्रकाशचिंताश्रुपातादयः ॥ यथा ॥ क्षोणीपर्यटि- शिव
तं क्षमापतिर्दुष्टायादापि विद्यार्जिता मानध्वंसनहेतवे परिचितास्तेनेवराटीश्वरा ॥ विश्रा-
यन्सरोजसुंदरदृशामास्ये न तावच्छ्रयः कृतानेन मया प्रयागनगरे न माधिनारायणाः ॥ स्रा

निर्निर्यत्नता निःसहता वा ॥ तत्र विभावाः ॥ आयासलङ्घनादयः ॥ अनुभावाः शिथिलादयः ॥
यथा ॥ आसीत्पुनरीक्षणानगिरिः कण्ठाद्धृदि निःसृताः सेदाश्लेषविविधविधानुमपिदाने वी
नतादेलिता ॥ ग्रानतास्मनपास्मगच्छतिहरो वं दाम्पुवं जातपक्षिण्ड कुरङ्गभङ्गुरस्तचः
स्तस्मास्थितादृष्टयः ॥ उत्कर्कोटिकानिष्प्रतिसंधानमिष्टहानिविचारो यार्थका ॥ तत्र दु
र्नयपरकोर्ध्यादयो विभावाः ॥ कंपशिरआच्छादनादयोनुभावाः ॥ यथा ॥ एते चिन्नादिवलो
चना गुरुजना जिह्वाग्रदोषाः खलालापोराः क्रूरवचः प्रपंचपरवः स्वस्य स्वश्च यत्तः स्वना किं
स्याद्धितमनर्थवीजमसत्कसंविंमवक्षोरुहिस्कुर्जल्किंगुरुकामयामनयनाः निश्चसावि
मस्मीति ॥ परोत्कर्षासहिष्णुता परानिष्टचिकीर्षा या असूया ॥ तत्र भावामन्युदोर्जन्माद
योऽनुभावाः ॥ कोपचेष्टादोषोद्भावनादयः ॥ यथा ॥ हरशिरसि शिमयाप्यलभ्यवासे निवसति
कापि कलानुधारमानो ॥ इति लिखति विधुं नुदस्य मूर्ध्नि प्रतिभवनं प्रतिमूर्खरं भवानी
हर्षोत्कर्षो मदः ॥ स्तु खसंभिन्नसुखानुभवसत्कर्षः ॥ तत्र विभावाः पानादयः ॥ अनु
भाववत्तमानां निद्रामध्यमानां हसितः ॥ अधमानां रोदनं ॥ इन्द्रियसंमोहरूपा ग्लानि द्वाल

स्यादिंद्रियसंमोहनयनघूर्णनसाम्येन क्वचिन्निद्रेव निद्रा न च हर्षे व्यभिचारिभावेति व्याप्तिः
10 तत्र हर्षमात्रस्य समत्वात् ॥ उत्कर्षरूपजातिविशेषस्याभावात् ॥ किं च तत्र मनो मोहो ऽत्र च मन-
नःप्रसाद इति स्वरूपभेदात् ॥ तत्र निद्रा रोदनादयो ऽत्र पुलकादयो ऽनुभावा इत्यनुभावभे-
दाच्च ॥ ननु तिष्ठ तिष्ठ क्षणं मूढ मधु याव[त्] पिबाम्यहमित्यादौ वीररसो ऽपि मदो दृष्टो ऽस्ति त-
त्र निद्रारोदनं वा कथमनुभावो नाहि यो ऽयं संप्रति रौद्रे इति निद्रानिद्रेति चेन्न सत्यं ॥ रसभे-
देनानुभावभेदाः ॥ शृंगारे तेऽनुभावाः ॥ वीरे नयनारुणत्वचमत्कारादयः ॥ सामान्येन त्वम-
देनयनघूर्णनवचनस्खलनादयश्चेति ॥ यथा ॥ रसना रसयत्यलोमधुरं स्वयमस्याः क-
मनर्थकं ननु ॥ द्रुतितत्र समम्लामिंद्रियं प्रतिबिंबस्य मिषेणामन्नृति ॥ श्रमो वासप्रभवः प-
राभवः श्रमः तस्य विभावा रत्यध्वगमनादयो ऽनुभावाः स्वेदादयः ॥ यथा ॥ स रामचंद्रः सह
निर्गतायाः स्वेदांबुसंसिक्तपयोधरायाः ॥ अपांगपातैर्मिथिलात्मजायाः श्रमानशेषा- शिव
न् शिथिलीचकार ॥ उत्थानाद्यसमत्वमालस्यं ॥ विभावा गर्भादयः ॥ अनुभावाः क्रिया- १०
कातर्यादयः ॥ यथा ॥ हारं हारं तं स्तनहारयष्टिं करे ताराकुं नरायाविकलाभवत् ॥ गौरैः सुतागर्भ

वती विहस्य हृदंचलं कान्तरयां चकार ॥ दुःखावस्था दुःखानि तिरस्कारो वा दैन्यं ॥ अत्रौच्चल्यमिति के-
चित् तदसत् ॥ बहिर्विषयत्वेन तस्य तदनुभावकत्वात् ॥ विभावा विरहदारिद्र्यादयः ॥ अनुभावाः
कायक्लेशशुल्लीड्यादयः ॥ यथा तातचरणानां ॥ आसेकुं तलमालिकाननतटे नेत्रांभसा निम्न-
गामाधत्तेऽनल्पपंकुजारं दधानं प्रांतौ वत्स्यन्मनः ॥ किं चान्यद्विरहानलेन सरसं संदेहमानं वपु-
र्गेहे पीडित केतवेन सुतनोः पेनौषधं मृग्यते ॥ चिंताध्यानं ॥ ध्ये चिंतायामित्यनुशासनात्
ध्यानं च न स्मरणात्मकं ॥ स्मृतिभावस्यापृथक्त्वेन कथनात् ॥ किं तु चित्तैकाग्रता ॥ इष्टाना-
प्तिप्रभृतयो विभावाः ॥ अनुभावास्तापवैवर्ण्यनिश्वासवाष्पादयः ॥ यथा ॥ शंभुं ध्यायसि शैल-
राजतनये किं नाम जानीमहे तत्स्यैव विलक्षितन्नयनपादिव तन्नौ तापः समुन्मीलति ॥ अक्षोर-
क्षभिषेणागच्छति बहिर्गंगातरंगावलिः पांडिम्नः कपटेन चंद्रकलिकाकांतिः समुद्गच्छते
मोहो वैचित्त्यं ॥ मुहवैचित्त्य इति धातोर्मोहनं मोहः इति भावव्युत्पत्तो मोहपदं ॥ वैचित्त्यं का-
र्याकार्यापरिच्छेदः ॥ तस्य विभावाः ॥ भीत्यावेगानो चिंतादयः ॥ अनुभावास्तंभघातघूर्ण-
नदर्शनैर्नस्मरणादय ॥ यथा ॥ स्वंतस्फारसुवर्णाके नक दलद्वौ लिघ्रुतिद्वौ हिर्णीं लक्ष्मीं धी

सासमुद्यदिंदुवदनांक्षीणांबुधैःस्थिता॥ यांभुक्तंभयताकुलः शान्तमयः कर्तकम्रकंठेद्रियः सोऽभ्यज्ञात
भुजंगपातपतनो ज्ञातस्त्रिलोकीपतिः॥ संस्कारजन्मंज्ञानंस्मृतिः॥ संस्कारजन्मंज्ञानंअभ्यासमभिज्ञारूपं
स्मरणरूपंच॥ संस्कारजन्मत्वेनोभयसंग्रहः॥ अभ्यासाभ्यसमभिज्ञायोः पृथक्भावत्वापत्तेः संस्कारोद्बो
धकाः सदृशादृष्टचिंताद्याविभावाः॥ अनुभावाः भ्रूसमुन्नयनादयः॥ अभ्यसमभिज्ञायथा॥ कालिंदी
सरसः समेसनभसः क्रीडोपरिक्रीडितेचकंदमिदंसुधाकरकलामाक्रम्यविस्फूर्जति॥ चंद्रोपि
स्मरचापचापलमकारंसमालेपतेतस्मात्सैवकदंबकुंजकुहरेराधापरिभ्राम्यति॥ स्मृतिर्यथा
वदनांबुजलग्नहग्दृष्टिपातेमपिवक्षसवतंसमंसमूले॥ दाकुंचितहष्टिराधिकायाः स्मितकिर्मीरि
तमाननंस्मरामि इति॥ संतोषोऽकुटिलप्रकृतेःरवबुद्धिर्वा विभावाज्ञाननाशाभावादयः अनुभावाश्च
अभयभोगादयः॥ यथा॥ भूषाभस्मभुजांगमिवेश्मविपिनंशृंगारूपोवाहनंचैलंचर्मतथापिमन्म
थरिपोर्भोगकिमस्मरणपति॥ ईशात्वंकिमुहीपतेर्किमसुमहादेवेतिनोगीयतेकिंवानस्यचदेवदे
वइतिवासंज्ञाजनेस्मर्यते॥ स्वछंदः क्रीयासंकोचोऽव्रीडा॥ नयथांकाद्यांग्रामेतिसाप्तिः॥ तत्र
क्रियाविरहएव ननुक्रियासंकोचः॥ अत्रविभावाद्गुरुाचारादयोऽनुभावाः शिरोनमननय

शिव
११

नमुद्रणावदनप्रच्छादनादयः। यथा। प्रबोधावसाने॥ मिलन्ती मिलन्ती प्रतिफलगतं भालसिंदू
रबिंदुं दृष्ट्वा दृष्ट्वा कमलनयना केलिदीपप्रमेण॥ कांते वोलं हरति हरितं लोलमालोकयंती
यंत्रं पृच्छाद्यति परितः पाणिपंकेरुहेण॥ इतरादितरक्रियाकरणं क्रियायाः शीघ्रतावाच
पलता॥ मात्सर्यद्वेषरागादयो विभावाः॥ अनुभावाश्री दर्शनयाच्यारुण्यपरुषादयः य
था॥ लंकावासिनिशासेतुकारिणि रणोत्कीडाचमत्कारिणि श्रेष्ठानंदवचःप्रसारिणि रिपुरोरा
मे धनुर्धुन्वति॥ जालास्तत्सदवाननसमसमप्रारंभदंभस्फुरत्कोपाधिकरीताननुमेयविशि
ष्टस्यागाः कृष्णेनायः॥ चेतःप्रसादो हर्षः॥ प्रियदर्शनपुत्रजननादयो विभावाः॥ अनुभावाः॥
पुलकस्वेदाश्रुस्वरभेदादयः यथा पुलकितकुचकुंभपालिधोरांचल्गति मुकुंदमुखेंदुवी
क्षणाय॥ विचरयति न मध्यमंगाभीतिं गणयति नापि नितांतगौरवाणि॥ आकस्मिकेष्ट
निष्टोपपातनिवर्तः संभ्रमो वा आवेगः॥ वैरिदर्शनप्रियश्रवणोन्मातादयो विभावाः॥
अनुभावाः॥ त्वरागतिस्खलनविपर्यासादयः॥ यथा॥ एको वासमसि विन्यस्य सहचरीस्कं
धे द्वितीयः करः पश्चात्कुछति वस्त्रमेकमितरो भर्तुर्मुखे न्यास्यति॥ एकं कंटकवेद्धमस्ति च

12

रसो निर्गुणत्वमुल्लंठतो यान्मे दैत्यरिपुगीर्वाणरघुपतेरालोकमसेनाचरान् सकलमवहाय

क्षमज्ञानघनात्मतुला । नचमूर्छापस्मारनिद्रासुषुप्तिषु तिष्ठति शान्तिः ॥ तत्त्वज्ञानविरहात् न

चालम्भीति त्रासेषु तिष्ठति शान्तिः ॥ नाचतत्रकतिपय अवहास्यरसत्वात् ॥ दुष्टानिष्टदर्श

नादयो विभावाः ॥ अनुभावास्तु नवभावनानि निमेषप्रेक्षणोच्छ्वासनिष्ठामपरिछेदादयः

यथा ॥ दुःपारवारिनिधिपारमुदारवीर्यमागच्छतो हनुमतो हसितं वितेनुः ॥ इन्द्रीक्ष्मनी

रनिधिनीरमर्धीश्वीचिचिचार्पिताडुवपुनः कपयो बभूवुः ॥ आत्मनि सर्वाधिकत्व

बुद्धिः सर्वस्मिन्नधमत्वबुद्धिर्वीरागरे ॥ बलैश्वर्याभिजनलावण्यादयो विभावाः अ

नुभावास्तु अवज्ञाभ्रूदृष्टिचेष्टितहसितपौरुषश्रुकादयः । यथा परशुरामवाक्यं ॥ निः

पीतेक्षलशोद्भवेन जलधौ गौरीपतेर्गङ्गयाहो नुं हंसवपुर्ललाटदहनेयाचल्लतः प्र

क्रमः । तावत्त्वमया विपक्षनगरीनारीदृगंभोरुहद्वंद्वप्रस्खलदम्बुवारिप्रदलेः ॥

स्खषाः पयोराशयः ॥ इष्टक्षयादेरनिष्टनिरासानाविषादयः इष्टपदेनजीवनध

नयशःशरीरपुत्रकलत्रादयस्तत्राः ॥ अपराधधावनगमनादयो विभावाः ॥ अनुभावा

निद्रा

उत्तमानां सहसा यान्वेषणोपायचिंतादयः ॥ मध्यमानां विमनस्कता ॥ अधमानां ध्यानधावन
मुखशोषनिःश्वासादयः ॥ यथा ॥ प्रस्थानस्य यदि त्वं जानासि भवनेऽवा वां भवेत्तत्र यो निर्गच्छामि नि
कुंजमेव यदि वा को वेद किं स्यादितः ॥ निद्रामेव यदि त्वं विदधे न लभे किं जातमेतावता मध्ये व
र्त्मकलानिधेः समुदयो मातः किमातन्यतां ॥ औत्सुक्यं कालासहिष्णुता ॥ सैवं द्विधा ग्राम्ये के दे
वीक्षणाद्भोगाद्वा प्रियसंस्मरणादयो विभावाः ॥ अनुभावास्तन्द्रीगात्रगौरवादयः ॥ यथा ॥ आद्यः
केशपिकेलिकौतुकमनोरागेऽपि द्वितीयः पुनर्मल्लीकेतकचारुचंपककनत्कांभोजस्रजां गुंफने
कांचीकुंडलहारहेमवलयन्यासे स्थितोयस्ततो नीतः सुंदरि वासरस्य चरमो यामः ॥ कथं पास्य
ति ॥ दुतरादितरादिं द्वयमपहाय मनस्वि विषयदार्वर्तते ॥ तदा निद्रा सुषुप्तस्य कारणत्वात्सुप्ता स्या
क्लानिद्रा भरतेनोक्ता ॥ स्वप्नवहनादिकार्यं मनो यदा वर्तते तदा स्वप्नादिसंभवः ॥ तत्र विभावाः ॥
स्वभावचिंतालस्यक्लमादयः ॥ अनुभावाः पार्श्वकाराणनयनभ्रूचलनविभ्रमवचनस्वप्न
तपन दर्शनादयः ॥ यथा ॥ गच्छन्कच्छे तु हितुः पिच्छगुच्छावतंसः पश्यन्नस्मद्वदनमसकृच्चक्षुषाकुं
चितेन ॥ स्निग्धापांगः शिथिलचरणः स्तोकविस्पष्टहासः स्वप्ने दृष्टः कमलकलिकामंदुनो मे

13

यथेंदुः ग्रहाद्यावेशोऽपस्मारः । तत्र विभावाः । अथाविस्रम्भन्मस्थितिनिधानुवैषम्योल्कादुः
खभयादयः अनुभावाः कंपफेननिश्वासभूपतनविपर्यासजिह्वालोलनादयः ॥ यथा ॥ उद्वे
ल्लन्नयनपत्रबाधरुत्वः पर्यस्तगात्रवाभुजाः स्फूर्जत्कोणफेनबिंदुपटलेनाकीर्णा देहश्रियः
श्वासभ्रूभंगकलापकुंतलजुषः स्थाला निलोलं पिताः शैलं प्रेक्ष्य कपोलिमानितरपस्मारं दधु
र्धराः । मूर्छा चात्रैवांतर्भवति एवमपि विश्रामपमनःपुरीततीयदावर्तनेनसुप्तिः निद्रा
विभावाः ॥ अनुभावाश्नेत्रनिमीलनप्रलयश्वासोच्छ्वासादयः । यथा ॥ श्वासोच्छ्वासप्रवलद
धरोपांतमामीलितांतं क्रीडाकुंजेनपनतुः कृष्णः श्रीमुरारेः ॥ अंतस्मेरं निभृतनिभृतं का
पि कर्णावतंसं काचित्कान्ताः कनकवलयं दामगुप्तानिकाचित् ॥ इंद्रियाणां प्रथमः प्रका
शो विबोधः निद्राछेदो विभावा ॥ अनुभावा अंगभंगाक्षिजृंभणाक्षिमर्दनांगुलिमोटनादयः
यथा ॥ राधायाः सहसा हृताकुवलयद्रोणीदरिद्रं नभः कुर्वंत्याः कलकंठकंठनिनदैः कांते
निकेजाग्रत ॥ अंगाक्षिविविवर्तमानवपुषो देवस्य कंसद्विषो लोलापांगतरंगभंगचतुरं ने
त्रांबुजं पातु नः । पराहंकारप्रणामनोत्कटसमीहाऽमर्षः । विभावाः अपमानाधिक्षेपादयः
अनुभावाः स्वेदशिरःकंपनयनाताम्रापादयः । यथा ॥ अपराद्धानेयमर्तुं साक्षिजनयनास्त्वनु

शिल १३

सेनासमेतं मुक्ताहां गलन्मूलेद्दत्तानुरक्त मभिनीतो मृतो ग्रामधामः॥ सद्यन्मार्गावलोकप्रचलनय
नयात्तीतयास्ताकमेनां लेकानुमाद्यांकिंवारघुपतिर्वराणां भोजयोर्धीजयामः॥ आकारआहार
संगोपनमवहित्थं॥ विभावा व्रीडाधार्ष्ट्यकौटिल्यगौरवादयोऽनुभावास्त्वाकारगाम्भीर्यादि
रा क्षौ स्वाकथनादयः॥ यथा॥ स्मितकान्तिविसर्पिभिः सगौरवान्यद्भुः सप्ताम्भोनिधिः किंचिन्कुर्वन्ति सो
पि सारनिरतः सीतापरिष्वङ्गता॥ दुःखाकर्षणमुद्गजनस्मयवचनं श्रोत्रान्नोरावणोमुक्तादामक
ण्ठाक्षंठमविवेकीरक्षविस्मयमस्मीति॥ उग्रता निर्दयता॥ विभावास्त्वपराधदोषकीर्तनचौर्याभिद्रो
हे मादयः॥ अनुभावास्तर्जनताडनादयः॥ यथा॥ कोदंडच्युताभिन्नभूपतिभुजादंडैः प्रचंडैः कृतं
तत्रस्माप्रातिपक्षराजरमणीवैधव्यदीक्षागुरोर्गुरु पितः॥ कृष्टकाकुठारतारपतनप्रभ्रष्टदुष्टद्विपनु
घट्टं तद्दलैः कृतोस्मि विधिविद्यतनाम्रक्षमुद्धौ सनो॥ यथार्थंतानं मतिः॥ अत्र विभावाः शास्त्रचिंत
नादयः॥ अनुभावाः शिष्योपदेशभ्रूक्षेपकरवालनस्वानुषंगादयः॥ यथा॥ लादीनेत्रपुटीपयो
धरघटीक्रीडाकुटीदोलतिपायाद्वयवर्णनेन कविभिर्मूढैर्दिनंनीयते॥ गोविंदेतिजनार्द
नेतिजगतां नाथेति हृष्टेति च मात्वरैस्समयस्तदेकमनसां पुंसां परिक्राम्यति॥ नयविनया

15

नूनयोपदेशो यथा हंमानग्रथ्यां तर्भवंति ॥ उपदेशो यथा ॥ वक्तुं गदेयं खलु तोयदेयं मनोविधेयं च
रतोहरस्य ॥ निजे विधेये स्मितिभिर्विधेयं विधेयं विधेयं विधिवेवेति ॥ रूपाहंभोंहि विधेयः प्रणाय
मानकोपान्माच ॥ प्रणयमान्यथा ॥ पाषाणो यदि मार्दवं वदि पयोधारा कृता को दरे मालीनांच
दने सुधा यदि विषं गर्भे हिमानी यदि ॥ स्वेमा किं च समीरणो यदि तदा स्वप्रेम वेल्ल सन्ताकिन
मस्य मन्मथ भूमिपाल भगवन् क्रोधान्मुधा धावसि ॥ कोपो मानस्य मर्ध्ये एवांतर्भवति ॥ यथा ॥ जन
यति जनने देवदेवात्मजामरा सुधासमीन लेकृधांशोः ॥ हरसि वहसि सर्वं सूते तथापि न तापदरूप
ति वक्र सखासि किं ब्रवीमि जनादि विकारो व्याधिः ॥ कुपितधातुभयकामलेशादयो विभा
वाः ॥ अनुभावादेशोपदेशा ॥ यथा ॥ हालं स्वीयमनर्घदीधितिपदं तस्याः कुरंगीदृशः केयूरं कन
कांगुलीयकमिया नेतुं बहिर्गच्छति ॥ अन्यस्य समनिवेद्यामि किमितो वेणीमिया कालियो
दृष्टो लोचनवारि कालियसरोभ्रांत्या परिम्लायति ॥ चिंताविचारोस्मा वारतुन्मादः ॥ न याग
मागमनेः तिआप्नेः ॥ चिंताविचार इति पदेनागमावर्तनात् तत्र मुख्येमुहूर्त इंतदर्शो विचार
एव क्रियान्तर्भवति निमन्देतानि ॥ अपेक्षकाणि केतुन्मादः इति यस्य मतं तत्रेदं दूषणं तत्रवि
भावाः प्रियवियोगविभवभ्रंशादयः ॥ अनुभावा वृथालपितहृष्यहसितरुदितादयः

श्रीप
१५

यथा ॥ नैवाकारि पिचंडकालिकां च नलतासेवास्ति मे राधिकापृष्ठा चेन्न कुतोपि जल्पति तदा
संमूर्छितावर्तते ॥ इत्थं हेतुविचिंतसिंचति मुहुर्मीरेरधीरे दृशौ वीतं वातनुते करे शंभुजयो
राधायसंभावने ॥ प्राणानिष्क्रामणं मरणं ॥ विभावानुभावौ स्पष्टौ ॥ यथा ॥ पर्यंकः प्रविकी
र्णोवाढुपतनः संग्राममूर्मोमिमियालेकेशस्य नकेशपाशमलिनः स्रष्टुं समाकांक्षति ॥ इत्थं नो
ष्मकरः करं विकिरते वक्त्रारविंदेन वास्ये स्वेभ्याम्निमिथः कथामपि सुराः स्मम्नमातन्वते ॥
मनोविक्षोभस्त्रासः ॥ तथा च विचारो क्षोभमनःक्षोभोभीतिः ॥ आकस्मिकमनःक्षोभस्त्रास इ
ति विक्षोभेरनेव द्वयोरप्येकत्वेन परिग्रहः ॥ तत्र विभावाः ॥ घोरस्वनश्रवणारमसत्वदर्शनाद घो
यः ॥ अनुभावाः ॥ स्तंभस्वेदस्वरभेदरोमांचस्खलतगात्रनादयः ॥ यथा ॥ श्रावानोहरिनामराम
वदनादिंदुस्पर्शकोवहनन्कुर्वन्कान्तरमांतरं स भगवान्मैनाकभूमीधरः ॥ कुंबसप्तसतिम्भ
ग्निनग्मतिह्वतः स्वसंगवोहानृतिमत्त आहतिसिंधुपंककुहरेनिमंकुमाकांक्षति ॥ धियारो
वितर्कः ॥ विभावाविप्रतिपत्तिसंशयसाधकबाधकमानसमुद्भावनादयः ॥ अनुभावाः ॥
शिरःकंपभ्रूचालनादयः ॥ वितर्कश्चतुर्विधः ॥ विवादात्मा ॥ संशयात्मा ॥ अनध्यवसायात्मा
विप्रतिपत्त्यात्मा चेति ॥ अनध्यवसायस्तर्ककोटिकः पालयः ॥ प्रत्येकमुदाहरणानि ॥ कालि

15

कालिंदीविलुठत्कठोरकमठस्कंधधत्तुःगांभवंगामोबालमृणालकोमलवपुर्विशो
यतेशोसुयः।स्माराम्रबलाःस्वबलाःक्षितिभृतांगोष्ठीशशिखापुंस्त्रास्मात्केवलमे
बतिष्ठतिममश्वेयस्कारोभावानर॥सौंदर्यस्यसमनोभवेनगणनानालेयवाकिमेकोद्द
मालावचापस्यविलोकितुंत्रिजगतीमेवाकिमुद्धीविकाश्मानंदद्रुमकंदहीनम ली
नयोःक्रियासमुन्नंभतोरायोयाःकिमुचाल्पभावप्रभगारोमालिरुन्मीलति॥कथ
यकथयकेघंस्वंजनंलेखयंतीविस्फुरतियमुनायाःपायसिस्वर्णावल्लीः॥अथमु
दयतिकोपाशामदःशीतभानुस्तनुपरितिनिभिरारणामेघकोवाविवर्तः॥द्रुपंनवि
लसत्सुधाकारचलाधिकाराधिकाकारंकिरणमालिनःकिमुसहेतनस्यावपुः॥
नवाकनकमंजरीवहतिखंजरीटंयतःस्तनस्मरमदालसाकथयकेयमुन्मीलति
ननुदर्शावस्थायामभिलाषगुणाकथाप्रलापाअभियाअभिभावाभ्यंतरेनगणिता शिव
तत्किंस्यात्तत्राएवेतिचेतन॥ओत्सुक्येअभिलाषस्यवर्णनात्मकस्यतोगुणाकथा २५

घात्॥ स्मादेयश्लाघस्यांतर्भावात्॥ अत्रगलितमालिनि॥ छलमपिकोप्यभिचारिभावइति
तांबूलाहरणाच्छलेनरमणाश्लेषोपिसंवलितइतिशृंगारेदर्शनात्॥ रौद्रेइंद्रजालादि
दर्शनात्॥ हास्येलक्ष्यदेशान्यापदेशादौदर्शनात्॥ धीथिभेददर्शनाद्य॥ संगृह्णन्कियास्तं
पादनंछलं॥ विभावास्त्ववमानप्रतिपक्षकुचेष्टादयः॥ अनुभावावक्रोक्तिनिभृतस्मि
तनिभृतवीक्षणप्रसृतिप्रच्छादनादयः॥ शृंगारेयथा॥ संकेतीकृतकाननंप्रविशतो
रम्योस्मकौतूहलादन्यत्वप्रतिभानमारचयतोरम्योन्यमुत्कंपतो॥ कुंचत्कार्यमितस्त
त॥ किसलयैरात्मानमावृण्वतोराधामाधवयोर्निकुंजकुहरात्क्रीडिकापातुवः
संग्रामेयथा॥ सग्रापिलुप्तानकपटंवृराशीन्पुरोपकंठेषुनरीक्षमाणाः॥ हृशोकपीड्रस्य
मुखेसखेदमायोजयामाससमानचंद्रः॥ सर्वाणिव्यभिचारिस्थलानिविस्तरभिया
नोदाहृतानि॥ आलस्यौग्र्यजुगुप्साःसंभोगवर्ज्याः॥ विप्रलंभेचआलस्यग्लानिनिर्वेदं
श्रमशंकानिद्रौत्सुक्यश्रमअपस्मारसुप्तविबोधोन्मादजाड्यामृत्याव्यभिचारिणः॥ हा
स्येअवहित्यालस्यनिद्रासुप्तप्रबोधास्तथाव्यभिचारिणः॥ करुणोमोहनिर्वेददैन्यजा·

समाव

16

श्रविषादश्रमापस्मारोन्मादग्लान्यालस्यस्मृतिवेपथुस्तंभस्वरभेदाश्रूणि अभिचारि
णः ॥ रौद्रे उत्साहस्मृतिस्वेदावेगामर्षोग्रचंचलतास्वरभेदकंपरोमांचा अभिचारिणः
वीरे उत्साहस्मृतिधृतिमतिगर्वावेगामर्षोग्ररोमांचा अभिचारिणः ॥ भये स्तंभस्वेदग
द्गदतारोमांचवैवर्ण्यचिंतामोहावेगदैन्यचापलत्रासापस्मारश्रमलयमूर्छा अभिचा
रिणः ॥ बीभत्से अपस्मारमतिव्याधिश्रममोहावेगवैवर्ण्यानि अभिचारिणः ॥ अद्भुते
स्तंभस्वेदगद्गदताश्रुरोमांचविभ्रमस्तंभा अभिचारिणः ॥ अमेव अभिचारिभावा रसा
नुकूलाकूलनीयाः ॥ स्थायिनोपि अभिचरंति ॥ हासः शृंगारे ॥ रतिः शांतकरुणहास्येषु
क्रोधो वीरे भयं करुणे शृंगारयोः ॥ जुगुप्सा भयानके ॥ उत्साहविस्मयौ सर्वरसेषु अभि
चारिणौ ॥ उत्साहो रौद्रहास्ययो रिति ॥ इति भानुदत्तविरचितायां रसतरंगिण्यां अभि
चारिभावनिरूपणो नाम पंचमस्तरंगः ॥ ५ ॥ अथ रसा निरूप्यंते ॥ विभावानुभावसा
त्विक अभिचारिभावैरुपचीयमानस्थायिभावः परिपूर्णो रस्यमानो रसः ॥ भावधि
भावानुभाव अभिचारिभावैर्मनो विश्रामो यत्र क्रियते स वा रसः ॥ प्रबुद्धस्थायिविभा

शिव
१६

यथा सनाथासरः ॥ प्रबोधकाविभावअनुभावसात्विकअभिचारिभावाः ॥ नवयूनोः प्रथ
मानुरागोऽत्राभिव्यक्तिः पूर्वानुभवभावादिति वाच्यं ॥ तत्रापि जन्मांतरीयानुभवसत्वादिति स
चरालोद्विविधः ॥ लौकिकोऽलौकिकश्चेति ॥ लौकिकसन्निकर्षजन्याप्रमालौकिकः ॥ अलौ
किकसन्निकर्षोज्ञानं ॥ तेषु चानुभूतेषु ज्ञानमेतज्जन्या ॥ ननु अनुभूतेष्वपि तेषु ज्ञानसंस्का
रद्वाराज्ञानमेतत्स्मरणासम्भिः ॥ अलौकिकोरसस्त्रिधा ॥ चाक्षिकोमानोरथिकऔपनाय
निकश्चेति ॥ औपनायनिकश्च काव्यप्रपदार्थचमत्कारेनाद्येच ॥ परंतु द्वयोरप्यानंदरू
पता ॥ नानुमानोरथिकोरसोनप्रसिद्धइतिचेत्सत्यं ॥ धन्यानां गिरिकंदरे निवसतां ज्योतिः
परंध्यायतामानंदाश्रुजलं पिबंति शकुना निःशंकमंकेशयाः ॥ अस्माकं तु मनोरथो
परचितप्रासादवापीतटक्रीडाकाननकेलिमंडपजुषामायुः परं क्षीयत इत्यादौ मानो
रथिकशृंगारस्यैवयानात् ॥ शास्त्रेषु रसस्यैवविघ्नगणनात्मा ॥ रसेनविनाचसुखानुपपत्ते
रिति ॥ नवविशेषाः ॥ तत्र भरतः ॥ शृंगारहास्यकरुणारौद्रवीरभयानकाः ॥ बीभत्साद्भु
तसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः ॥ सकलाधिदेवतो विष्णुः स च शृंगारस्य देवतं तेन स

17

कलाकौशलादिविषयत्वेन मुख्यतया प्रथमं शृंगारोपन्यासः ननु वात्सल्यं स्नेहो लभ्यभक्तिः कार्प
ण्यं वा कथं न रसः ॥ आर्द्रताभिलाषश्रद्धास्पृहाणां स्वरसत्त्वादिति चेन्न तेषां व्यभिचारित्वा
त्मकत्वात् ॥ ननु करुणरसस्य ते व्यभिचारिभावा भवेयुरिति चेन्मैवं वात्सल्ये करुणो रसः स्नेहोऽस्य
हास्य ॥ भक्तौ शान्तिः कार्पण्येऽपि हास्य एव नन्वेवं परस्त्रीत्वादत्र व्यभिचारित्वेनावश्यक
त्वात् ॥ धर्म्मिकल्पनातो धर्म्मकल्पनाया लघुत्वाच्च व्यभिचारी रतिरेवास्तु किं करुणेनेति चे
न्न । रतेः शोक इति शोककातराणां तदीयानां नेत्रपक्ष्मीलनत्वात् । किंचारतेः करुणस्य व्यभिचारित्वे न
शृंगारहास्यरौद्रवीराणां कथमिथुनपरस्परप्रीतिहास्यक्रोधानंदानां तत्राभावात् ॥ बीभ
त्सस्य जुगुप्साया अभावात् ॥ नाप्यद्भुतस्य न जातिघृतापि विस्मयस्यास्थिरत्वात् ॥ तस्मात् शोक
स्य स्थायितया स्थायी शोकः ॥ करुणाख्यो निरिक्तो रस इति ॥ ननु रतिरेवास्तु किं हास्येनेति व
त्सकस्मात्तु व्यभिचारी ॥ करुणरौद्रवीरभयानकबीभत्सानां तत्रानवकाशात् ॥ नाप्यद्भुतस्य
विस्मयस्य तत्रास्थिरत्वात् ॥ न च शृंगारस्य ॥ रतेः स्थायित्वाभावात् ॥ परंतु रत्या समं हास्यस्याक
र्षं ननु रतिहास्ययोरसंकीर्णस्थानाभावात् स्थायित्वं कथं स्यादिति चेन्न ॥ हेतोरसाधारणप्रा
त् ॥ असाधारणप्रमत्रस्थायित्वं ॥ यथा रतेः सांकर्ष्येऽपि स्थायिशोकाद साधारणकरुणोऽभि

शिव
७

ष्ठते ॥ धर्मो नायकयोरेव मह्यं ॥ न च वात्सल्यादावपि अस्य साधारण्येन वत्सलादिनाट्यं संति तेषामपि
रसत्वापत्तिरिति वाच्यं ॥ शार्दूलादीनामपि इति आलंबनाश्रयत्वेन तत्र साधारणीकृतश्रृंगाररसत्वाप
त्ति ॥ न च स्नेहाः श्रेष्ठभयं च ॥ तस्मादीर्ष्यादिकोपाग्नेर्दुर्वारात्मवर्तनाभिनिवेशनं ॥ अपि
भेदेन भेदात् ॥ उत्साहवासना वीरे न तु रौद्रे ॥ क्रोधवासना रौद्रे न तु वीरे ॥ इत्यत्र मन एव सर्वत्र
साक्षी नियन्तो परस्परं परिपूर्णः प्रमोदः ॥ सम्यक् संपूर्णः रतिभावो वा शृंगारः ॥ एतेनैकचयमो
दस्य रतेर्व्यभिचारित्वं न्यूनतायां अतिरेके वा परिपूर्णत्वं सा भावत्वमिति ॥ स च द्विविधः संयोगो वि
प्रलंभश्चेति ॥ तत्र दर्शनस्पर्शनसंलापादिभिरितरेतरमनुभूयमानं सुखं ॥ परस्परं संयोगो नो
त्पद्यमानमानंदो वा संयोगः ॥ संयोगो बहिरिंद्रियसंबंधः ॥ अस्य देवतं विष्णुः ॥ वर्णः श्यामः ॥ य
था ॥ लोभेन यातु च नानिपदाहतानि पाति तिमयो धरगतो जडतां जगाम ॥ लक्ष्म्याः परं तु पृथु
वेपथु रवनीवीं विलिखन् हृदयं मन्मथसूदनस्य ॥ नितान्तं स्तनयुग्ममध्यवदनं कान्ते कुचां
तः स्पृशितस्तामसत्कृत्य दर्शितवलिमध्यं कनाभिप्रियः ॥ तथा पादद्वयं संभ्रमलदलद्रोणी
मदद्रोहिभिर्दृष्टेः कान्तस्तरंगिते विरचितो दीर्घापुरेवस्मरः ॥ देशानां समयानां नायकानां ना
यिकानां च भेदेन नायकोरवस्थाभेदेन च बहवो भेदास्तेन च रसमंजर्यां विशेषतो दर्शिता

किंचितं

इहविस्तरभियानप्रदर्शिता॥ अथ लतावानिरूपणे॥ तत्र भरतः॥ लीलाविलासोविच्छित्तिर्वि
१४ भ्रमः किलकिंचितं मोट्टायितं कुट्टमितं विब्बोको ललितं तथा॥ विहृतं चेति विज्ञेया दश हा
वास्त्रयोषितां॥ नारीणां शृंगारचेष्टा हावः॥ स च स्वभावजो नारीणां॥ ननु विब्बोकविलास
विच्छित्तिविभ्रमाः पुरुषाणामपि संभवंतीति चेत्सत्यं॥ तेषां सोपाधिकाः स्वभावजाः स्त्रीणा
मेव ननु चेद्यदि सदैवतासांते कथं न भवंतीति चेत्सत्यं॥ उद्दीपकान्वयव्यतिरेकाभ्यां नापि
कानां हावानाविर्भावतिरोभावौ इति॥ लीलाविलासविच्छित्तिललितानि शारीराणि॥ मोट्टा
यितकुट्टमितविब्बोकविहृतानि आंतराणि॥ किलकिंचितमुभयसंकीर्णमिति॥ प्रियस्य
वेषवचनाद्यनुकृतिर्लीला॥ तत्र विभावः सखीषु कौतुकप्रलापः॥ अनुभावः प्रियपरिहा
सः॥ यथा॥ वंशीं शौरेरमाद्रिवुंकिं निमनो जिह्मस्मितं सुभ्रुवां तां यत्कौतुकपालयाविरचिते
वंशीरवे राधया॥ एषस्फुरंति कस्मानि स्वनतीति कौथा कुंजकानने राधां वीक्ष्य लतागता नपि
हितां स्मेरो हरिः पातु नः॥ गमनवदनवदनभ्रूभ्रमंती नाथः कश्चिद्दृश्यते विशेषः स विला विव १८
सः॥ तत्र विभावाः॥ प्रियदर्शनस्मरणादयः॥ अनुभावाः अभिलाषवैदग्ध्यसंकेतप्रकाशप्री
तिप्रकटनादयः॥ यथा॥ स्फुरज्जलकां चिदास्फुरद्दलितरश्मयव्यापिवेषच्छद्मपुर्वाला कुंडलकांतिसं

विचलितग्रीवंलपंस्यावचः॥आननिर्जितपुंडरीकपरिभिस्संदिस्यमाटचूरीहृषियंप्रतिजायतेव
रतनोर्थेकासलकाधिकः॥कतिपयभूषणाधिन्यासोविच्छित्तिः॥तत्रविभावाः॥सौकुमार्यप्रिय
सौभाग्यसौंदर्यचतौर्गौधलेकेशप्रकाशादयः॥अनुभावागर्वमानलेशप्रकाशादयः॥यथा॥केश
रंनकरोपदेनकटकंमौलौनमालापुनःकस्तूरीतिलकंतथापिननुतेसंसारसाराश्रियं॥सर्वांधि
कमलेखिभालफलकेपदेधसाधुपुरोनानीमःनिमुतत्रमन्मथमहीपालेनमुद्रार्पिता॥या
स्थान गंगाभूषणानांविपर्यासोविभ्रमः॥तत्रविभावाः॥धनमदरागोत्कंठादयः॥अनुभावाः॥प्रिय
सत्वाधुपहासादयः॥यथा॥सखंकेलिविधौनिजांशुकधियापीतांबरस्यांशुकंपर्यायायाःपरिध्या
यकेलिभवनान्मातःप्रयोगमावदिः॥प्रादानुंवसनोत्तरलचपलयन्कोपंस्मार्दर्शयन्स्यायावानुर
मावारिस्मितपुष्पाहिन्नेयोहरिःपातुवः॥श्रमाभिलाषगर्वस्मितहर्षभयक्रुधांसंकरःकिलकिं
चितं॥तद्यथा॥श्रमाभिलाषगर्वाणांस्मितहर्षभयक्रुधां॥असकृत्संकरःप्राहेर्विज्ञेयंकिलकिं
चितं॥अत्रविभावाःनवयौवनोद्रेकदर्शनाचस्यादयः॥अनुभावाः कर्णमानिद्रारागादयः॥यथा॥
कोदंडमारोहतिचंद्रिमानंमधुव्रतःकोसनिशोशिमानां॥परंपुधांवसतिवेपमानंस्वस्ताव
लःस्वियतिकिंनिदानं॥क्रोधागारसमुत्थितासमुदयत्संग्रासतेलादितानीडाभिःपाम

दुहितुः

१७ र्दिताः स्मितसुधाधाराभिरुद्वर्तिता ॥ लालाल्लेहालेमनोभवचकलामालाभिरामूषितापावाकुर्भ
पिशेलराजतैनयास्फीताः कृतार्थसहरा ॥ वार्ताभैमुख्यमतिनिम्नमस्ययोदर्शनस्पृहामोहयितं
अस्यविभावाः सपत्नीजासलोचनासलज्ञादयः ॥ अनुभावाः मनःप्रेमकथनसंकेतनिवेदनाद
यः ॥ यथा ॥ नस्नेहस्यकथारसे कथमपि श्रोतुंसमुत्कंठते राधा किंनु विकूणितानकपटादागस्य·
तोधाहहि ॥ नसमन्ते अपुटिसुतरुकुचनाटिलेदो असदोत्तीटि भावलांभ्रुकुटिसवलमपटिपुनः
सुस्मांतिकेभाम्यति दुःखिमुखमुखचेष्टाकुहसितं ॥ अथ विभावाराशेोलंघ्यदानकरानसततकुं
तलाधरस्पर्शादयः अनुभावाः कपटकोपसंकोचकपटसीत्कारादयः ॥ यथा ॥ रोकुंपाणिः प्रस
रतिचिरादंगुलीर्निश्चलासो भ्रूविक्षेपोभवतिकुटिलोनेत्रमंतःघसन्नं ॥ नाआस्येपिभवति
सुतनोरुद्भुमाभोनकारः पंथोमर्दुप्रसतिमुखंसमुखंनप्रमाति ॥ गर्भाभिमानसंभूतोविका
रोऽनादरात्मकोविब्बोकः ॥ अस्यविभावायौवनमदधनमदकुलमदप्रियापराधादयः अ
नुभावाअवहित्यदुर्वचनदुःप्रेक्षणादयः ॥ यथा ॥ कृतांजलिः कान्तराद्दि पातः प्राणेोमदःपा
र्श्वमुपाजगाम ॥ साधीमुखेकुंडलरानेरिवा मेघापुनःप्रक्ष्यामाचकांक्षः ॥ सकलांगसमी शिव १८

वीनविन्यासोल्ललितं ग्रैवसिन्नात्येतर्भवंति ॥ अथ विभावा मनःप्रसादप्रियतमहृदयानु
रागधीरत्वादयः अनुभावाः प्रियवशीकारलीलानुरागाच्छलत्वादयः ॥ यथा ॥ कलहकांतिनमे
ऽविलेचपलेयाहृने ओंचलेमसन्वमुखमंडले अवृणासंचकुंडले ॥ स्फुरत्पुलकवेधुरं त्वपितपीन
मानाधरं विहस्यकमलेक्षणा संअजनितकस्यकेलीगृहे ॥ प्रियसन्निधावभिलाषापरिहृतिर्वि
हतो तत्रलज्जादयो विभावाः अनुभावाः अन्यथाचेष्टितमप्यवहित्थादयः ॥ आज्ञा यथा
अभिलषति कपोले चंद्रखंडे विधातुं तिलकमुदयदंतःकोपभाजाभयात्मा ॥ कुलिपति भयरू
द्धांगमुत्कंपयंत्या प्रबलयसनयातेर्निश्चिनाः केलिदीपाः ॥ लज्जालोयथा ॥ आनंदभाजो यदुनंद
नस्य करात्परोधं न करोत कुर्या ॥ न विलपंतीमिति संजयानचकोरनेत्रानुबुभुक्षोदकेन पूर्णार
न्यो मुमुदितानां पंचेंद्रियाणां संबंधाभावो वा अभीष्टाप्राप्तिर्वा विप्रलंभः ॥ नवमानान्मकेवि
प्रलंभे अप्राप्तिः ॥ मुदितपंचेंद्रियसंबंधाभावरूपस्यापि विशिष्टाभावस्य तत्रापि सत्वात् ॥ तदानींप्र
योरिंद्रियाणां मुदितत्वाभावात् ॥ ननु प्रियमभिसर्तुं यागच्छंतिसा विप्रयुक्ता भवेदिति चेत्सं
साविप्रयुक्तैव ॥ अधिरदर्शनप्रमाथाप्रमोदेन विरोधे हर्मेस्याः कृपाताद्धे रतंभवादिति ॥ सचवि
प्रलंभः पंचधा ॥ हेत्वांतरागमनात् ॥ गुरुनिदेशात् ॥ अभिलाषात् ॥ ईर्ष्यातः ॥ शापाद्वेति ॥ समयाद्वा

२०

छिद्रयदिमादयोप्युन्नेया: देशांतरगमनाद्यथा ॥ प्रस्थानाय स्वतो घमे प्रियतमे दोःकंकणेन
च्युतं धैर्यैणस्खलितं मदेन गलितं नेत्रांभसा निःसृतं जीवेनापि पिपासुना शिवमिव सा
रंभियामगच्छत ॥ कंपादोलितकिंकिणीकलरवव्याजेन वैराग्यस्मृतिः ॥ यथा नानावराणां ॥
वीणाम्मं चेकथमपि मखीभार्थनाभिर्निधाय स्वैरं स्वैरं सरोजदृशा गानुमारभ्य मेव
तेऽपीनुज्ञा किमपि विरहक्षीणादीनां गवद्भीमेनाम वसद्राति वहु यो मूर्छनाचित्रमेलन
मुह्नि देशाद्यथा ॥ भास्वांक्षलतरुगुरुर्मेनलिज: कोप्येककर्मंगास्तेमोमे दोगंधवहः सितोम
लयुतो दोषाकरो माधव: ॥ संगायोनवपद्मवः परभृतो विज्ञो गुणो गात्रया निर्मातो सि
विचारिता: कथमभीः क्रुद्धा त्वयानग्रहा ॥ अभिलाषाद्यथा ॥ आगाराभिमुखं मुखं वरत्त्वय
तोर्चे कौतूहलतरलीयतो अमुखं चोलमजानतो ॥ क्वचिदपि मा जाम्युनस्तिष्ठतो: ॥ मा गां विरम्य
रतोऽक्वचित्क्वचिदपि सक्ताक्षरं जल्पतो साचि प्रेक्षितमात्र योऽर्धंदमवद्रूप स्तदा शास्महे
दृष्टोतो यथा ॥ प्रातो गा स्तवश्च भवतिमन: प्रेमहेमप सूनं चेतश्च तेर्द्र गापि कमलं जीवनं
बंधुजीवं ॥ आसारस्त्वेग्रथितमखिलं वेधसा तस्य भंगो स्मादेनं पामपि निपतं वंदिमानं शिव २०

विमुंच ॥ कापायथा ॥ अम्बरमपि दि निर्गन्तुमिच्छा निर्गच्छ दूरतः ॥ प्रियाविरहतापेन पापदग्धो भ
विष्यसि ॥ सम्भयापायथा ॥ विश्लेषजीवनश्रीडापीडाविधुरमानसा ॥ तस्थौ प्रातः प्रियं प्रेक्ष्य वक्री
वक्रीकृतानना ॥ दैन्यापायथा ॥ जीवने मृतिविश्लेषो विश्लेषमनिजीवनं ॥ दयोरपतनयो ह्नैना
महमेव निदर्शनं ॥ त्रासापायथा ॥ केलीगृहे यामिनीमंदिरे वा या कामलेखा नगरे हतोत्पाताः दूत
स्तत्र प्रस्थितयोर्नेपुनो वियोगजन्माग्निरामवह्निः ॥ इति भानुदत्तविरचितायां रसतरंगि

शृंगा

ण्यां रसनिरूपणं नाम षष्ठस्तरंगः ॥ ६ ॥ हासस्य परिपोषो हास्यः स च द्विविधः स्वनिष्ठः प
रनिष्ठश्चेति ॥ तावप्युत्तमाधममेदात्त्रिविधौ तत्र द्विधः स्वनिष्ठोपि षड्विधः ॥ परनिष्ठोपि षड्

ममंथ

द्विध इति ॥ द्वादशभेदो हास्यः तथाहि ॥ उत्तमानां स्वनिष्ठे परनिष्ठे च स्मितहसिते ॥ मध्यमा
नां स्वनिष्ठे परनिष्ठे विहसितोपहसिते ॥ अधमानां स्वनिष्ठे परनिष्ठे चापहसितातिहसिते
उत्तमानामीषद्विकसितकपोलमम्लानदर्शनमपांगमुग्धवीक्षितं स्मितं स्वनिष्ठं परनिष्ठं च
विकसितकपोलमुत्फुल्लाननमीषल्लक्षितदंतं हसितं स्वनिष्ठं परनिष्ठं च ॥ उत्फुल्लनासापु
टं कुटिलदृष्टिवीक्षितं कुंचितग्रीवं मधुरस्वरमुपहसितं स्वनिष्ठं परनिष्ठं च ॥ अधमानामकु
तमुपयदस्तुकंपितमौलिस्फुटतारस्वनमपहसितं स्वनिष्ठं परनिष्ठं च ॥ अश्रुद्गतमतिवहल

२।

क्षस्कृतेमखनमाक्षिप्तपार्थजनमारध्वस्तलालम निहसितं स्वनिष्ठं परानिष्ठं चेति ॥ स्व
निष्ठं स्मितं यथा ॥ लेखनीभिन्नरुतो त्रिलोकयक्षकृतकुमनजगाम यथाभूः ॥ तां पुनः श्रवणा
सीम्नि लंभितां ग्राम्यसंननमुखविस्मितं दधौ ॥ परनिष्ठं हसितं यथा ॥ रोमांकुरं प्रेमगतं रदाग्र
मुग्धघातिं सीधमुद्दीप्य विस्मो ॥ यदाहृता संधिमुतलस पौ [illegible] वघाधिपे नमा च कापमानस
परनिष्ठं स्मितं हसितं यथा ॥ हररत्नेषममुखे [illegible] समाधौ जयति [illegible] निभवरीसवर्णी
कोतिपर्णाः ॥ ईश भुजगपतेर्विभ्रुः [illegible] कलयति कद्रूलमंतिके भयान्याः विहसितं
परनिष्ठं यथा ॥ निःशामुले लस्य धियागृहीतेर्म बीजसैलिंममुखाररविंदं ॥ गोपप्रभाते
स्खलदस्तु नीरमधीरनादं जहसुस्ततस्ताः ॥ अपहसितं परनिष्ठं यथा ॥ कोनिरोधोमयार
श्य इति पद्यं पठन्बुधः [illegible] नतरस्थैनोपहस्यते ॥ अपहसितं परनिष्ठं यथा ॥
रज्जोस्वचेत्र [illegible] लग्नं परिमोचयंती ॥ द्विजांगनां दीर्घनालं संतीना
[illegible] जहास ॥ अतिहसितं परनिष्ठं यथा ॥ चोरः कामारिपोर्[illegible] निशितातः [illegible]
[illegible] तंडुले धियानीत्वापुनर्भुक्तवान् ॥ [illegible]
[illegible] निमुक्तमौलिकुसुमं स्वर्वैभपमार्
ले स्खलत्स्थापितन्मुद्यन्विघ्र्णान्विमानहार [illegible] शिव ४१

स्यते॥ शोकस्य परिपोषः करुणः॥ आशाविछेदसति सर्वेंद्रियक्षोभो या करुणः न च विप्रयो
गतिआशि॥ तत्रैषाशायाः सत्वात्॥ तछिछेदसति तु सविप्रलंभः करुणएव॥ शोको दुः
खं यथा स्वकपोतविचित्रितः॥ द्वैविध्यं करुणः॥ स्वनिष्ठः परनिष्ठश्चेति॥ स्वधा
पत्यवंधन॥ स्वक्लेशास्वानिष्ठैर्विभावैः स्वनिष्ठः परेष्टनाशापराधापपरावंधनपा
तादीनां दर्शनस्मरणाश्रवणैर्विभावैः परनिष्ठः॥ स्वनिष्ठो यथा॥ तव नाथ हार शरा
सनं तव देहेन सहैव भस्मसात्॥ अहमीश्वरतः प्रतीयते तव नास्मीति किंतु अनतामि
तः॥ परनिष्ठो यथा॥ अनुवनमनुयातं वाष्पवारिप्रजैनं तं मृदितकमलदामश्याममा
लोक्य रामं दिनमपि विधिरोचिविलापमंत॥ अन्नलोकजनिरपि चवधश्चेतारकाकाष्यविंदू
नु॥ परिपूर्णो क्रोधो रौद्रः॥ सकलेंद्रियाणां मोहत्वं वा॥ वर्णो स्यामः॥ दैवतं गुरुः॥ यथा
वंडांशुः॥ किं न यत्रैर्भुजमापतितरसोवर्तते किं न पाशः कुंताः किं देतिदंतानधौशिशिरा
शनिः किं न शास्त्रैर्विधिः॥ भीमोहं दुष्टदुर्जै धन निधनसमुद्दंडयाकुबभकाण्डप्रमाह

शकोपप्रलपहननवहोमास्मिकंसापिवध्यः॥ यथा वा॥ क्रीडाकुंतुगतरंगरयापरलीलवी
लतावीधरश्रेतराधिरूढजितधूलिघोरशितमस्तोमावली जगत॥ यदुक्तं मेदिनीं द्र
दधराप्राभुग्नभोगीन्द्रमस्त्रोदग्रफणाग्रतन्नहचिमिविघोतयामोवयं॥ परि
पूर्णोत्साहः सर्वेन्द्रियप्रकर्षो वा वीरः॥ वर्णोस्य गौरः॥ देवतं शक्रः सच त्रिधा॥ युद्धवीर
दानवीरदयावीरभेदात् पृथक् विभोक्ष॥ स उत्साहो युद्धवीरे प्रतापाध्यवसायादिप्रभ
वः दानवीरे दानसामर्थ्यादिप्रभवः दयावीरे आर्द्रतादिप्रभवः॥ तत्र युद्धवीरे यथा॥ संग्रा
मांगणमागते दशमुखे सौमित्रिणा विस्मितं सुग्रीवेण विचिंतितं हनुमता सत्रास
मालोकितं॥ श्रीरामेणापरं तु पीनपुलकस्फूर्जत्कपोलश्रिया सांद्रानंदरसालसा निद
धिरे चापासने दृष्टयः॥ दानवीरो यथा॥ अभ्यागच्छति मंदिरं द्विजकुले खंडाखंडं बुधि
क्षायाधिं लवणाप्युदुग्धजललिंदुग्धाय वेदास्पदि॥ दुर्योधनो विरहो भये दितिमियादीनेव
दिक्षाय गायसां घ्रिं न जहाति विप्रवपुषे रामाय तस्मै नमः॥ दयावीरे यथा॥ दयावीजंह
रेणे ग्रमंकुरस्तव भास्करः॥ ततः समुत्थिता वैतौ पद्मयोनाम लक्ष्मतो॥ भयसंपरिपोषः

सर्वेंद्रियविक्षोभो भयानकः कृष्णोस्यवर्णः दैवतं यमः स च स्वनिष्ठः परनिष्ठश्चेति ॥ अपराधात्
स्वनिष्ठः ॥ यथा ॥ गोपीसीरपटीपिनद्धनविधिस्थापारयामो विदो ॥ पितोस्मादनशंकयापि शिशुमुपनु
देवः प्रकाश्य त्वां ॥ रीमां चेरचयन् हृतौ मुकुलयन्नंगमुल्लंघयन्ती तुर्वेनमसि प्रसर्पति गृहं सा
यं समागच्छति ॥ परनिष्ठो यथा ॥ गंगायाः सलिले निमज्जति जटाजूटे पुरारेः स्मति भ्रयपत्यविदु
ताथानेफणिफणाभोगेभ्य चिन्हीपतो ॥ कुत्वीभूयहरस्य कर्णाकभीरं निर्गनुमुत्कंठते पाहोतस्य
मुदीप्य किन्न कुरुते बालस्य कारण्यात् ॥ विहतनिनदाभारनिष्ठो यथा ॥ कुर्वाणो दशामिमुर्वैर्दं
दमुखेनादंष्ट्रैः कंपितांदिक्कुगेभ्यलितं रेरपि हृदये रामुच्छमाधावितां ॥ द्वग्रीवस्तनमुच्छलज्जलनि
धिमालोलवीचिभ्रमिभ्रश्यन्नेत्र गिरं कपाहनुमतो वक्रे दृष्टोसं दधे ॥ जुगुप्सायाः परिपोषो वी
भत्सः सर्वेन्द्रियसंकोचो वा ॥ वर्णोस्य नीलः दैवतं महाकालः ॥ स च स्वनिष्ठः परनिष्ठश्च ॥ स्वनिष्ठो
यथा ॥ कालीकुंडलिनीकुलस्य कलमिषः प्रारब्धसंभक्तति मंचतृष्टि चिवलद्वि हायक्षि चलद्धि श्रीनि
यातस्तथा ॥ वक्तुस्पृष्टविपक्षपक्षतभिरस्थोतस्थलीसीतालिभावपापुष्ट्रम निस्खलनयाहा श्रोधानु
लो भार्गव ॥ परनिष्ठो यथा ॥ छत्रं कुंभीद्रुकर्णौ र्थिरचयतानुताग्राम रंयाजिपुच्छेर्मालामुंदैः प्रचंडैः स

रस॰ शि
२३
२३

जगज्जयैर्मिदुपयोजयस्व ॥ स्वंगैर्नीराजनायाः कलधौतविधिमिति प्रेतहस्त्रांगनानामालापः कुं-
डलिम्नाप्तनयपरिणायां भजन्माय भूव ॥ विस्मयस्य समप्रकसमुद्विरद्भुतः ॥ वर्णोस्यपीनः ॥ देवतं ब्र-
ह्मा मचस्यनिष्ठः परनिष्ठश्चेति ॥ स्वनिष्ठो यथा ॥ लीलानिवद्धपाथोधिर्हेलाहतदशाननः रामः
सीतयाश्लिष्टमात्मानं वद्धमन्यत ॥ परनिष्ठो यथा ॥ सकाजीरांदुकूलवद्धमुमतीं वद्धांवुधिर्विदु-
वद्वाणाग्रेण जरत्कपोतक इव आपादितो रावणः ॥ लंकाकापि विभीषणाय सहसा मुद्रेव हस्ते
ऽर्पिता श्लेक्लैवं रघुनंदनस्य चरितं को वा न रोमांचति ॥ अस्तुक्लिं अमोक्लिं चित्रोक्लिविरोधाभासभ्रमतयो प्र
द्भुताएव ॥ अस्तुक्लिर्यथा ॥ भूयादेवसतां हिताय भगवान्कोलावतारो हरिः सिंधोः सेयाम पांसुपस
दृशानं साते क्षितायाभुवत् ॥ नायाहारातिवारिदस्तिलकनिस्ववींहिनीमालयति ॥ क्रीडादर्पणतिक्षपा
पतिरहर्देवश्चताटंकति [illegible] विस्तीर्णो पर्णातिव्योमः ॥ चूर्णातिचंद्रः [illegible]मुकतिचंपा
कगिरिः खदिरसारतिरवीद्विरांसु ॥ अमोक्लिर्यथा ॥ तीव्रैस्तिग्मरुचः करैः परिचितां संकुं कपोलस्थ
लीं नीरागांनिकरं करेणहरतानुष्ठीकृतेनीमयो ॥ मैनाकं समुदीक्षपंकपतितं शालूकशंकाजुषो
हेरंबस्य पुनातु दंतशिखरमापारलीलारसः ॥ श्रंतः कौधाग्निजाग्रत्कपटननहरिस्फारनिःश्वास शिव २३

यात आश्रूताचारिया हा: कुलाधरतिमिन्नः सानुषुप्रसवलंतः॥ दिग्नागेर्नागवृध्वावनहरिणाकुलै:
शंकयाधान्नूलानां छायाभ्रांमाकियातै: सितवसनविधिपावीक्षितास्वर्वधूभि:॥ चित्रोन्निर्यथा॥ गि
रिमैवेति मोन्नि कायलिमलिहृदयेस्थावरं यावत्तुहिनदीधितेर्ध्वजनमारुतो यां धवः॥ धनुस्वपि तिमा
न्मथं शिथिलबंधनं वेधनं नमोमनसिजायते किमपि कौतुकं लन्यते॥ लोकसिद्धिकर्माखिलं चित्रोन्नि
रेव॥ विरोधाभासो यथा॥ कोप्यसौ तव मुकुंदनंदको निंदको भवति कं समंपदः॥ कुंडलीत्वमसि कालियं
कुतो दूरतो नयसि तन्निवेदय॥ नाप्येच सर्वे रसा आनंदरूपा अकुनाच्या:॥ परनिष्ठा एवेति॥ चित्तवृत्तिर्द्वि
धा॥ प्रवृत्तिर्निवृत्तिश्च॥ निवृत्तौ यथा शांतिरसस्तथा प्रवृत्तौ मायारस इति प्रतिभाति॥ एकत्र सौ सत्ति परत्र ने
था॥ न च रसत्वमेव सकलानुभविचारी॥ न शृंगारस्य॥ न हि रौद्रो बीभत्सस्यापि तत्र सत्वा
तिवकुमघाकवत्वात॥ न हास्यस्य॥ न हि रौद्रो रिपाकरुणस्यापि तत्र सत्वात्॥ अतएव न भयानकस्यापि॥ नापि
अतएव न बीभत्सस्यापि॥ न च सामान्यरसः तद्विशेषा इतरे भवंति॥ शांतरसस्य तर्हि रसाभासत्वापत्ते
शांतस्य तद्विरोधित्वात्॥ न च सामान्यरत्यादिभयजुगुप्साविस्मयादयस्तत्र मग्नेते विलीयंते तेनन
रिति॥ किंतु विषयानुबंधरतिहासशोकक्रोधोत्साहभयजुगुप्साविस्मयादयस्तत्र मग्नेते विलीयंते
चते अभिचारिभावा इति॥ लक्षणं च॥ प्रवृत्ताभिष्यानानवासनामायारसः॥ मिथ्याज्ञानमस्य स्था
यिभावः॥ विभावाः सांसारिकभोगार्जनधर्माधर्मा:॥ अनुभावाः पुत्रकलत्रविजयसाम्राज्या

२५

दयः। यथा। यादीलादीहृतं भोहरभसकरीकपिकाकापिकोनातत्त्वं चेद्रानुकल्पं स्फुट
यत्निमियः। कामिनीकामुनीनं रूपंकामानुरूपं मणिमयभवनं वंधुरं वंधुरागो लोके लो
केशकस्य त्वमसि न भुवने सर्वदा सर्वदाता॥ नायमभिन्नपरं निर्वेदस्याविभावः॥ शांतोपि
नवमो रस इति॥ निर्वेदस्य परिपोषः। शांतो रसः॥ दोषदर्शनमाधवा दोषाः कामक्रोधादयः॥ अ
सविषयदोषविचाररचिरमादयो विभावाः अनुभावा आनंदाश्रुपुलकहर्षगद्गदवच
नादयः॥ यथा॥ हेमं हर्म्यमिदं निकुंजभवनं वेषं प्रदेयं धनं पेयं तीर्थपयो हरेर्भागवतो गेयं प
दांभोरुहं॥ नेयं जन्म चिराय दर्भशयने धर्मे निधेयं मनः स्थेयं तत्र सितासित स्य सविधे ध्ये
यं पुरारातिमहः॥ वेदस्याध्ययनं कृतं परिचितं भाष्यं पुराणं श्रुतं सर्वं व्यर्थमिदं पदं न कमलाकां
तस्य चेत्कीर्तितं उक्तास्ते सदृशा प्रसृते विरचिताः सेकोंभसा भूयसा सर्वं निःफलमालवालवल
येक्षिप्तं न बीजं यदि॥ इति श्रीभानुदत्तविरचितायां रसतरंगिण्यां रसनिरूपणं नाम स
प्तमस्तरंगः॥ ७॥ स्थायिभावदृष्टिरष्टधा॥ स्निग्धा हृष्टा दीना क्रुद्धा दृप्ता भीता ललिता शंकि
ता जुगुप्सिता विस्मिता चेति॥ अभिचारभावजा दृष्टिर्विंशतिधा॥ शून्या मलिना श्रांता ल
ज्जिता शंकिता मुकुला अर्धमुकुलिता ग्लानाध्याना जिह्मा कुंचिता वितर्किता अभितप्ता वि

शिव
२५

घस्ता ललिता केकरा विकोशा विभ्रान्ता विप्लुता त्रस्ता मदिरा चेति ॥ रसभेदादष्टधा रस
दृष्टिः ॥ कान्ता हास्या करुणा रौद्रा वीरा भयानका बीभत्सा ऽद्भुता चेति षड्विंशद्भेदा दृष्टयः
कूणिता विकसिता ऽर्द्धविकसिता चलिता मुग्धा घूर्णिता ऽलसा विवर्तिता ऽर्द्धविवर्ति
ता आवर्तिता ऽर्द्धनर्तिता पर्यस्ता ऽस्पाक्लिमिता चेत्याद्यपो दृष्टिभेदा ऊहनीयाः ॥ ललि
ता यथा ॥ मनसिजनृपतिर्वा मंडनं वा मदो वा शशिमुखि भवनं वा यौवनं यावनं वा ॥ अ पं
खिलमपि हृतार्द्धं वीचिविक्षेपखेलत्कमलविजयलीलाशालिनालोचनेन ॥ त्रस्ता
यथा ॥ पर्यस्तालकरोचिषः श्रमरुषः प्रस्विन्नगंडत्विषः शंभोः शीकरशीतलेन शशिना
याते समातन्वति ॥ जीयास्तामचलाधिराजदुहितुर्निस्पंदनीलोत्पलच्छायानिद्रितवं
चनीकमिथुनस्पर्द्धासमिद्धा दृशो ॥ एवमन्यास्तूदाहरणीयाः ॥ अथ रसानां जन्मजनकभावः न
तत्र भरतः ॥ शृंगाराद्धि भवेद्धास्यो रौद्राच्च करुणो रसः वीरात्स्यादद्भुतोत्पत्तिर्बीभत्साच्च
भयानकः ॥ अयमुत्सर्गः ॥ परेषामपि रसानां कार्य्यकारणभावदर्शनात् ॥ पूर्वग्रंथकार
संमतिरपि ॥ कथानुग्रहरूपोगाच्च विवक्षावशातः कवेः ॥ अथ मोन्यजन्यजनकरसाभावा

भयं त्वमी॥ यथा॥ मातर्दृष्टद्दृगंभोरुहयुगलगलद्धूम्रधारासुदान्तां तस्य प्रेक्ष्य वक्षःस्थलेरु
२५ धिरुचयं क्रुध्यता भार्गवेण॥ हस्तेन्यस्तस्सहस्रार्जुनदमनसमारंभगंभीरवीर्यः स्फूर्जद्दो
र्दण्डहस्तीसकसकलकलास्वत्रधारः कुठारः॥ अत्र वीरं प्रति करुणा बीभत्सयोः कारण
ता॥ यथा ताल तव राणानां॥ कुरंगास्यावेणीं कुंभगाविपरीतेरतिविधावधिस्कंधं दृष्ट्वा कि
तं मपि निपतं मरिभरः॥ अधिग्रीवं पुष्पस्रवलकरवालं मतिकरं स्मरन्नेव रूतबूक्तो विरम
तिपरिरंभणात् रसाल॥ अत्र भयानकं प्रति शृंगारस्य कारणता॥ यथा वा॥ युधि कुपितहन्तात
स्पंदनस्पर्द्धिनादं दिशि दिशि दृशाकं ठत्वक्रव्यान्वारिदास्रं॥ तदिति जनकपुत्र्याः साम्यमा
लोकमानस्य जातिनयपनास्त्रराघवः खिन्नपाणिः॥ अत्र शृंगारं प्रति वीरस्य कारणता
एतेषामंगांगिभावापन्नानां रससंकर इति॥ नामलोकालपेति रसानां मिथो विरोपि धो
तत्र भरतः॥ शृंगारबीभत्सरसौ तथा वीरभयानकौ॥ रौद्राद्भुतौ तथा हास्यकरुणौ वैरिणौ शिव
मिथः॥ वैरिरसद्वयवैरिरसविभावानुभावममिचारिभावा अपि रसहानिकरा इति॥ तदपि २५
वारयेत्॥ तत्र प्राचीनसंमतिः॥ न च वैरिरसं ब्रूयात वैरिणं नापि भावकं॥ न विभावं च संचा

रिभावं नैव कदाचनेति किं त्वंगांगिभावानापन्नयोरेकदेशे सत्यपि वैरं देशाभेदे सति
न वैरं ॥ महोदधेः कीलासंयोगात्तदभावयोरिव समयभेदे सत्यपि न वैरं ॥ भूतले घटतदभाव
योरिव वैरं यथा ॥ प्रायेणालिंगमानायाः प्रियायाः कुचकुंभयोः ॥ करजक्षतनिर्मुक्तं रुधि
रं कुंकुमायते ॥ देशाभेदे सति विरोधाभावो यथा ॥ एकः सिंधुभुवः करे विलुलितश्चक्रे द्विती
यः स्थितः कामध्वंसिनि कालकूटकवलश्लिष्टस्तृतीयो धृतः ॥ भूयो नीरनिधेर्धनप्रमथ
ने समुल्लसितस्मात् पायासुः कमलापतेर्भगवतो नानारसाः पाणयः ॥ अत्र शृंगाररौद्र
करुणाद्भुतरसानां विरोधाभावो ॥ समयभेदेन यथा ॥ स्वच्छं कामरिपोर्धनुः परिहृतं रा
ज्यं स्थितं कानने निर्भिन्नस्त्रिशिराः खरस्यापि विहितं स्वच्छं कपिर्लालितः ॥ लंकेको दलित
श्चिरायरुदितं लंकावधूनां कुलं नीता सम्प्रविदेहभूः तादपि लं रामस्य लोकोत्तरं ॥ अत्रा
द्भुतशांतभयानकरौद्रवीभत्सहास्यकरुणाशृंगाराणां विरोधाभावः ॥ अंगांगिभावाप
न्नानां रसानामेकत्र समावेशो यत्र सा रससबलतेति वेदितव्यं ॥ तस्याप्येतदेवोदाहरणं ॥ अं

गयोर्वैरेपि नरसस्हानिर्भयस्योर्वैरप्रमोदिव ॥ यथा ॥ स्मृत्वा सीतां तरंगप्रचलकुवलयस्पर्द्धिचक्षुः
२६ क्षपन्तीं सेनां सबीभत्सरक्षःशरदलितवपुः शोणितासारसिक्ता ॥ रामे रागक्रोधदष्टच्छदश्रमुखनिप
तन्नेत्रे तुलामप्रमोदक्रीडत्कालीकरालभ्रुकुटिसहचरीं संबबंधे चापदृष्टिः ॥ अत्र शृंगारबीभ
त्सयोर्विरोधेपि नरसस्यहानिः ॥ एवमंगांगिभावानापन्नयोरविरोधिनो एकत्र भावेपि
नरसहानिः ॥ यथा ॥ भोजंगिमं गिरिमधे जलदात्मकं च शास्त्रप्ये ब्रमुमुचेद्रथाकं धरेण सर्वे
विदेहतनयाविरहाकुलेन रामेण वह्निमयमस्त्रमिव अलोकि ॥ ननु बीभत्सशृंगारयोः स
हजवैरं कुतो मधुनिपीय निःष्ठीवतोः संभोगदर्शनाद्धिति चेत्सत्यं ॥ बीभत्सस्य जुगुप्सा॰ पा
यिभावः सा च तद्दर्शनेन नतरां घस्य भवति ॥ ननु तयो रागोत्कंठ्यादिति ॥ ननु तथापि बीभ
त्सशृंगारयोर्हृष्यते ॥ तथा हि ॥ यद्यपि हि दिव्याबालामुंडमालानपायिनिस्सज्जाति नरकपालैरीर
वेरर्भचेलं ॥ तदपि गिरिसुतायाः पक्षपातः पुरारौ समुदयति विचित्रः कामिनोः प्रेमबंधः
सादावितिचेत्सत्यं ॥ निजभर्तुरयमेपि भूषणत्वेन भस्मनि शयनेन पत्न्या स्नात्र जुगुप्से वनावयत
इति जुगुप्सितत्वेन प्रतीयमानमेव जुगुप्सामाद्रकं भवति ॥ किंच प्रियसंबंधोपाधिवदम

धिकं तत्र प्रमोऽस्यघते ॥ तस्मात्स्थायिभावाभावाद्धो मत्सत्वेन ज्ञायत इति ॥ ननु वीरस्य युधि
गच्छतः सर्पदर्शनेच चकितता रौद्रे चाकस्मिकोत्पातनिपाते विस्मय इति चेत्सत्यं ॥ चकितताविस्मय
स्थानत्वात्स्वभावेनानुभवमेवसतिसंचारिविशेषभेदः ॥ वीरस्य न प्रतिभयाद्वयं किंतु भुजंगात् रौद्र
वनस्पतिबलवत्वाद्धिकालिकत्वाते विस्मय इति रसधैर्योत्पादकमखिलमवधयेन तत्र भूर्योचा
र्याः ॥ अस्मच्च्रमस्वेरसोत्पादकं वचनं तथा ॥ नवाः सर्वरसभावजैर्नाम शास्त्रविस्तारदेः ॥ वचनमि
लुप्तलक्षणं ॥ एवं विभावानुभावेष्वपि द्रष्टव्यं ॥ यथा ॥ ध्मातं हंत लताङ्क मधुसमयः कुजवाहूति कासो
मेघच्छायाप्यचंचलमिदं प्रेमवाक्रुवहूनो ॥ आयुर्वायुप्रचलनलिनीवारिबिंदूपमानं मानं मुग्धे
विसृज सकलं तुच्छमेव प्रतीमः ॥ अत्र निर्वेदप्रतिपादकमखिलं नत्व शृंगारविरोधि ॥ नौचित्यं च स
र्वेषामपेयं ॥ तत्र प्राचीनग्रंथकृतः अनौचित्यादृते नान्यद्रसभंगस्य कारणं ॥ प्रसिद्धौचित्यबद्धस्तु र
सहबोधयज्ञायते ॥ उद्वेगकरमनौचित्यं ॥ लोकप्रसिद्धमप्रसिद्धं मौचित्यं तस्माद्धर्यो भूतो विषेऽभि
धारितमेवरसः ॥ एकस्यैवरतिश्चेद्रसाभास एव एकस्याश्चरतिश्चेद्रसाभास एव ॥ क्रमेणोदा
हरणानि ॥ लीलासमागमश्लाघ्याबंधुं दशकंधरं ॥ यहत्रुं क्षमते कामो रामो वा निशितैः शरैः ॥ अत्र

रावणस्येव रतिर्नतु सीतायाः॥ निधुवनवनप्रान्ते यान्तं चलैर्नयनाञ्चलैः किमि
ति वलितग्रीवं मुग्धा मुहुर्मुहुरीक्षते॥ विफलमखिलं दूनो नो चेदुदेति परस्प
रं रतिरथ मनोजन्मा देवः स एव निषेव्यतां॥ अत्र नायिकाया एव रतिर्न तु
नायकस्य॥ एकस्यानेकविषया रतिराभास एव॥ परं त्वेष विशेषः यस्य
व्यवस्थिता बह्व्यो नायिका भवंति तत्र न रसाभासः॥ तथा सति दक्षिणस्य स
कलोत्तमनायकस्य बहुकामिनीविषयाया रतेराभासतापत्तेः॥ तस्मा
दव्यवस्थितबहुकामिनीकवैषयिकनायकपरमेतत्॥ अत एव वै
शिकानां वेश्यानां च रसाभास इति प्राचीनसंमतं॥ एकस्या अनेक

नायकविषयारतिर्यथा॥ संपल्कस्यापत्ताराभवति नरलितायतुरानेत्र
ताराद्दृष्टाकेनापधकांचीपदमिस्तुरवगताबेपतेरत्नकांची॥ उग्रः कस्यापनु
दः सखिपदनुगमेकश्चिदग्रेमितापः स्यात्केनाग्रवेणीपयसिविलुलि
तापल्लतेकापिवेणी॥ एकस्यानेकनायिकाविषयारतिर्यथा॥ पंचेषुस्ति ति ४
पपल्लापल्लहरीप्रीतिसंदीयापुनः कासांनस्नानकांचनस्याचलनटेकास्मी
रपंकापते॥ कासांमूर्द्धनिनैवनीरजदृशांसिंदूरलेखापते कासांवानच
कर्णाधाः प्रियसखिमाणिक्यभूषायते॥ यत्ररसाबहवः सरसशबल
इत्युच्यते॥ यत्रभावाबहवः सभावशबलः॥ तत्ररसशबलोदर्शितः॥
भावशबलोयथा॥ यत्रस्यैवस्तुभायमेस्कृतिपथेजायेततस्याचयम
काग्रेममकः स्मरस्त्रिजगतीं याविनाराधया॥ निर्मुक्तोचमनस्यपा

२४ मृगाक्षी लावण्यपश्यापाङ्गांधिग्जन्मकंगता सिकिं विलपितैः क्वासि प्रसन्ना भ
व। निर्वेदौत्सुक्यामर्षश्रममतिविषाद दैन्यानां भयानां कंकर्ष्यादे सभावशबल
इति॥ अथ रसभावाहंकाराणां अभिव्यक्तिः। रसस्थितिविधौ ऽभिमुखो विमुखः प
रमुखश्चेति॥ भावविभावानुभावैर्व्यभिचारिभिः अभिव्यक्तिः सो ऽभिमुखः॥ भावविभा
वानुभावानामनुक्तत्वात्स्वशब्दवाच्यत्वाद्वा यो विमुखः॥ परमुखो द्विविधः॥ अलंकारमु
खो भावमुखश्चेति अलंकारमुखे अलंकारो मुख्यो मनो विश्रामहेतुत्वात्॥ रसो गौ
णः॥ भावमुखे भावो मुख्यो मनो विश्रामहेतुत्वात् रसो गौणः॥ अत्र प्राचीना
वाक्यसंमतिः॥ अलंकारस्य रुचिरे चित्तविश्रान्तकारिणि॥ अलंकारस्य मुख्यत्वं
गौणत्वं रसभावयोः॥ अभिमुखत्वात्स्य प्रकरणेदुदाहृताएवेति। विमुखो यथा
मैथिली लक्ष्मणो रामः सुग्रीवः पवनात्मजः॥ लंकापुरं परित्यज्य पारं वारिनि शिव
धेर्ययुः संकटमखिलमुत्तीर्य्यैते समागतास्तुमुलो रसः॥ कष्टादयगम्यते॥ अले २८

२१

कारमुख्योयथा॥ स्थानलेषोंश्रमतामलीनांभातिप्रभातेनचवैरवियोगपाःस्था
लेगितेषुकिंतुपारभानोःकांतिंकलंकस्यवपुर्विलग्नां॥ अत्रापकृतेरलंकारस्य
मुख्यता॥ भावमुख्योयथा॥ सन्नाभोनिधितोरहितापदलोलंकारिणींमेदिनींदा
तुंविप्रकुलायपोजितवतःसंकल्पयाथ्योद्यमः॥ नाभीनीरभुवास्मयोरुहभुवात
कालमाविश्यतेहलाभोरुहभार्गवस्यकिमपिव्रीडास्थितंपातुनः॥ अत्रांकुतस्य
विभावस्यमुख्यता॥ दानवीररसोगौणः॥ विद्वद्वारिधिपालेहंतथावर्षेतुसंततं॥ लभ
तेविपुलांवृद्धिंपयारसतरंगिणीं॥ अवगाहस्यवाग्देविदिव्यांरसतरंगिणीं॥ अस्य
हृद्येनपद्येनरचयस्कृतिभूषणं॥ यावद्भानोःसुताकापिकालिंदीभुविनंदति॥ ता
वन्निद्युमेभानोरेषारसतरंगिणी॥ इतिमैथिलश्रीमत्कोविदकलासनाथश्रीग
णनाथसनूभिश्रितनयश्रीभानुदत्तमिश्रविरचितायांरसतरंगिण्यांरसनिरू शिव
पणंनामाष्टमस्तरंगःसमाप्तेयंरसतरंगिणी॥ नंदखस्नेकवाकेमुश्चाम्पिनैनस्म २०
पक्षके॥ पंचम्यामजवारेनुलिखितमेमयश्शुभः॥ लेखकपाठकयोःशुभंयातुः॥

२७

रसतरंगिणी

क्लौँ विप्र ग्रहे जन्म दुःखौघैव कैवलम्—
यः कौसौ दैवयोगाच्च प्राप्त लोभः पदे पदे
राम ॥

